1363	335 D	Vaidyajīvana with Malayāḷam commentary	Lolimbarāja com : Anonymous	M	22 x 4	5; 6; 24	Inc	Good	Commentary different from 1362
1364	364 F	Śataślokī with Malayāḷam commentary	Bopadeva com :Anonymous	M	29 x 4	61; 8; 36	C	Good	—
1365	113 C	Śārīra	--	M	14 x 4	24; 9; 14	Inc	Good	—
1366	95 A	Śārṅgadharasaṁhitā	Śārṅgadhara	M	36 x 4.5	71; 11; 58	C	Good	—
1367	180	Śārṅgadharasaṁhitā	Śārṅgadhara	M	24 x 4.5	192; 8; 20	C	Good	—
1368	330	Śārṅgadharasaṁhitā	Śārṅgadhara	M	36 x 5	86; 10; 48	C	Good	—
1369	333	Śārṅgadharasaṁhitā	Śārṅgadhara	M	33.5 x 5	134; 10; 34	C	Good	—
1370	323 D	Śārṅgadharasaṁhitā	Śārṅgadhara	M	27.5 x 5.5	9; 10; 22	Inc	Good	A portion of Chapter 9 in Cikitsāsthāna.
1371	341	Śārṅgadharasaṁhitā	Śārṅgadhara	M	26 x 4.5	19; 9; 25	Inc	Good	From Chapter 9 to a portion of Chapter 13 in Cikitsāsthāna.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Subject and Serial No.	Accession No.	Title of the Work	Author / Commentator	Script	Size	No. of folios; No. of lines per page; No. of letters per line	Extent	Condition	Remarks
1372	349 C	Śārṅgadharasaṁhitā	Śārṅgadhara	M	36 x 5	13; 9; 44	Inc	Good	A portion of Chapter 12 in Cikitsāsthāna.
1373	375 A	Śārṅgadharasaṁhitā	Śārṅgadhara	DN	36 x 5.5	5; 8; 40	Inc	Good	Upto a portion of Chapter 19 in Cikitsāsthāna.
1374	349 A	Sannipātacikitsā	--	M	36 x 5	5; 9; 44	C	Slightly damaged	From Rasendracūdāmaṇi
1375	349 B	Sannipātacikitsā	--	M	36 x 5	5; 9; 44	C	Good	From Yogaratna.
1376	184 B1	Sannipātacikitsā	--	M	29.5 x 4	7; 9; 40	Inc	Good	—
1377	184 B2	Sannipātacikitsā	--	M	29.5 x 4	9; 9; 40	Inc	Good	—
1378	109	Sahasrayoga	--	M	23 x 4	186; 8; 26	C	Good	—
1379	105 B	Sahasrayoga	--	M	23.5 x 3.5	7; 6; 30	Inc	Good	—
1380	117 B	Sahasrayoga with Malayāḷam commentary	--	M	36 x 5	69; 10; 46	C	Good	—
1381	247 B	Haramekhalā	--	M	19 x 4.5	68; 7; 17	Inc	Good	On treatment of poisons. Work published in Trivandrum Sanskrit series.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Subject and Serial No.	Accession No.	Title of the Work	Author / Commentator	Script	Size	No. of folios; No. of lines per page; No. of letters per line	Extent	Condition	Remarks
1382	372 B	Haramekhalā	--	M	26.5 x 5	15; 11; 34	Inc	Damaged	Paṭalas 5 to 13 in Part 3.
1383	453 C	Haramekhalā	--	DN	17.5 x 4	81; 7; 30	Inc	Slightly damaged	Upto a portion of Paṭala 14.
NĪTI, KĀMA SAṄGĪTA etc.									
1384	78 E	Kāmarasāyanā with Malayāḷam commentary	--	M	24 x 4	3; 8; 30	C	Good	Some recipes of virility.
1385	113 A	Gānāni	--	M	14 x 4	4; 9; 20	Inc	Good	Some songs in Sanskrit and a few in Kannada.
1386	78 F	Caturvidhastrīlakṣaṇa	--	M	24 x 4	2; 8; 32	C	Good	The characteristics of four types of women like, Padminī, Cakriṇī, Śankhinī and Nāginī.
1387(E)	448 B	Nidhidarśana	--	DN	23 x 4.5	3; 9; 36	Inc	Good	The means for spotting out places containing precious stones.
1388	66 F	Nītiśataka, Śṛngāraśātaka	Bhartṛhari	M	21 x 4	13; 10; 35	Inc	Slightly damaged	—
1389(E)	123 N	Nītisāra	--	M	26 x 3.5	8; 8; 32	C	Good	Stanzas on moral precepts.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Subject and Serial No.	Accession No.	Title of the Work	Author / Commentator	Script	Size	No. of folios; No. of lines per page; No. of letters per line	Extent	Condition	Remarks
1390(E)	247 D	Pañcatantrasaṅkṣepa	--	M	19 x 4.5	62; 11; 20	Inc	Good	Upto a portion of Tantra 5.
1391	78 D	Ratirahasya with commentary Dīpikā	Kokkoka com : Kañcinātha	M	24 x 4	26; 8; 38	C	Good	—
1392(E)	476 A	Ratnaparīkṣā	--	M	18 x 4	22; 8; 22	C	Good	On the varieties of precious stones. From Agastyasaṁhitā.
1393	142 E	Sannītirāmāyaṇa	Rāmācārya	M	17.5 x 3.25	5; 7; 18	Inc	Good	A brief material narration of the Rāmāyaṇa story, each statement being substantiated by a general maxim. The Ms contains only the Bālakāṇḍa.
1394(E)	247 F	Śiśurañjanī	--	M	19 x 4.5	28; 8; 20	Inc	Good	A modern prose table.
1395	247 E	Sunītibhāgavata	Rāmācārya	M	19 x 4.5	35; 11; 20	C	Good	A brief metrical account of story of Kṛṣṇa, each statement being substantiated by a general occasion. The work published by Sukṛtīndra Oriental Research Institute, Cochin.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Subject and Serial No.	Accession No.	Title of the Work	Author / Commentator	Script	Size	No. of folios; No. of lines per page; No. of letters per line	Extent	Condition	Remarks
1396	104 B	Subhāṣita (I)	--	M	18.5 x 3	12; 7; 28	C	Good	—
1397	112 B	Subhāṣita (II)	--	M	24 x 4.5	8; 10; 32	C	Good	—
1398	123 P	Subhāṣita (III)	--	M	26 x 3.5	3; 9; 38	C	Good	—
1399	123 Q	Subhāṣita (IV)	--	M	26 x 3.5	17; 8; 34	C	Good	—
1400	301 I	Subhāṣita (V)	--	M	12 x 4	25; 8; 16	C	Slightly damaged	—
1401	419 G	Subhāṣita (VI)	--	DN	16.5 x 4.5	8; 8; 20	C	Good	—
1402	424 C	Subhāṣita (VII)	--	DN	24 x 4	4; 5; 26	C	Damaged	—

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

PART – TWO

EXTRACTS FROM MANUSCRIPTS

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning :

श्री वेदव्यासाय नमः । अविघ्नमस्तु ।

हरिः ओम्। वृषा दर्विकुलं ह वै शिबिकुलं बभूव। तस्यायमितिहासः । कुलविद्या बभूव। तद्यो ह स्मै समधीते । स ह स्म राजा भवति। स किञ्चित् प्राप्यान्तर्हितः । सोऽब्रवीत् । यो मामितिहासं ग्राह्येद् वरमस्मै दद्यामिति ।

End :

त्रिवृत्ते शिरो गात्रं चक्षुःस्तोम आत्मा। साम मे तनू वामदेव्यम्। बृहद्रथन्तरौ पक्षौ। यज्ञायज्ञियं पुच्छम् । इत्यङ्गानि । धृतिणया शेषाः । यजूंषि नामा सुपर्णोऽसि । गुरुत्मा दिवं गच्छ सुवपता ।

Colophon :

इतिहासं सम्पूर्णम् ।

7
ṚKPADĀNTADĪPIKĀ

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
भूतेशोऽपि प्रसादार्थी यस्याभूत् त्रिपुरान्तकः ।
कारुण्यनिधये तस्मै गणाधिपतये नमः ॥
मनीषितेषु सर्वेषु भासतां मे सरस्वती ।
विश्वप्रकाशिनी शश्वत्कुमुदेष्विव कौमुदी ॥
ऋग्वेदपाठे शाकल्यं दृष्ट्वैतद्वर्त्मना कृतिम् ।
पदान्तदीपिनीं नाम करोम्यर्थानुबन्धिनीम् ॥
बहुशः संशयं दृष्ट्वा बहुधा धीमतामपि ।
ऋगाम्नायपदान्तेषु तच्छेदाय यतामहे ॥
आलोच्य शौनकप्रोक्तं प्रातिशाख्यं प्रयत्नतः ।
विवृणोम्यत्र मूढोऽपि मूढानुग्रहकाङ्क्षया ॥
आवश्यं किं न कुरुते मन्दानत्याग्रहग्रहः ।
गुणैकदर्शिनस्तन्नः सन्तः सन्तु कृपालवः ॥
षोडशव्यञ्जनोत्थानि वाक्यानि व्यञ्जनद्विकैः ।
कथयन्त्यष्टरूपाणां प्रतिवर्गं स्वरैरपि ॥
वाक्यसव्यञ्जनमितैस्तद्गतैः षोडशात्मनाम् ।
संख्या नवभिरेवैते ऋलृवर्णौ सदीर्घकौ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

अकारश्च यतः शून्यमथाष्टानामयं क्रमः ।
पदे [illegible] ॥
Digitized by Arya Samaj Foundation Chennai and eGangotri
आकारान्त इकारान्त एकारान्तस्तथाष्टमः ।
द्वाभ्यां द्वाभ्यां स्वसंख्याभ्यां हल्भ्यां... सूच्यते ॥
ज्ञेया वाक्यस्थवर्णानां संख्या कटपयादिका ।
नान्तओदन्तकोदन्तौ तान्तष्टान्तः ततः परम् ॥
एकादेशे संहितायां पद ओजस्वरादिकः ।
इत्यन्तः सप्तमस्तु स्यादष्टमस्तु परिग्रहः ॥
संहितायां षकारस्य सादेशो नवमः स्मृतः ।
पकारान्तस्तु दशमः मकारान्तस्तदुत्तरः ॥
ऋकारान्तो द्वादशको लृकारान्तस्त्रयोदशः ।

End :

वायावायाहि । धन्वी सन्ना लया दूना धनवन्नर्तनं शि ना ।
वायवीन्द्रः । तद्रतिर्नवनं रिष्टं सनदन्नस्य नष्टनम् ।
अश्विना । धन्वी नित्यालका गानी धनशक्यवनं खनम् ।
ओमासः ।

8
ṚKPADĀNTADĪPIKĀ

Beginning :

श्रीवेदव्यासाय नमः । निर्विघ्नमस्तु । शुभमस्तु ।
साक्षान्मूलप्रमाणाय विष्णोरमिततेजसः ।
आद्याय सर्ववेदानां ऋग्वेदाय नमो नमः ॥
हरिः ओम् ।

अग्निमीले । सास्त्वब्जानुत्थयागभ्यामनड्वान्नच्च न ध्वनः ।
यदङ्ग । पवस्वं निर्जनेत्यन्तसन्नमन्तत्र निर्नयम् ।

End :

आयङ्गौः । बालगो नु सनी मानं सनरत्नक्रमन् स्यनम् ।
संसमित् । गतितिर्नाययामष्टमनसं न सनुः सनम् ।
इति अष्टमाष्टके अष्टमोऽध्यायः समाप्तः ।

Colophon :

इति पदान्तदीपिका समाप्ता ।

CC-0. Prof. Satya Vrat Shastri Collection.

आचम्य । प्राणानायम्य । देशकालावनुकीर्त्य । श्रीमहाविष्णुप्रीत्यर्थं धर्मार्थकाममोक्षचतुर्विध-पुण्यपुरुषार्थसिद्ध्यर्थं समस्तमङ्गलावाप्त्यर्थं [illegible] अमुककामीरथे कर्मणि शुद्ध्यर्थं वृद्ध्यर्थं ब्राह्मणैः सह स्वस्तिपुण्याहवाचनं करिष्ये इति सङ्कल्प्य ।

Digitized by Kala Bhandar, Foundation Chennai and Gangotri

End :

आदौ तु कन्यावरणं मुहूर्त्तं निरीक्षणं दानमथाक्षतानाम् ।
आरोपणं मङ्गलकङ्कणं च माङ्गल्यसूत्रं नववस्त्रबन्धः ॥
प्रधानहोमस्तु करग्रहः स्याद् भ्रात्राप्यनुज्ञाप्य च लाजहोमः ।
प्रदक्षिणं स्याद् हृषदावरोहणं नताम्बरं ग्रन्थिविमोचनं च ॥
आरोपयेत् सप्तपदाद्विड्धा वरस्य कुम्भोदकसेचनं च ।
प्रधानहोमं मुखरोमकृन्तनं करं च बीजं च जलाभिषेकम् ॥
वस्त्राञ्जलिं कुण्डललेपनं च स्रुक्पादुकं छत्रसवेणुदण्डम् ।
मषीशिरोवेष्टनमूर्ध्वशाखाहोमं च कुर्याद्दशभिः समिद्भिः ॥
इष्टं च होमं त्वथ व्याहृतीश्च विष्टा च मौञ्जी च विसर्जनीये ।
समावर्तनश्लोकः ।

Colophon :

इति लोकोपकारकसमन्त्रप्रयोगे विवाहविधिः समाप्तः ।

Ms. 74 and 87 begin as :

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि केषांचिद्वृत्तिकारादिभाषितम् ॥
प्राणानायम्य सङ्कल्प्य परितः स्थण्डिलं शुचिः ।
अधिकं वेषुमात्रं वा गोमयेनोपलिप्य च ॥

The works give the mantras according to the Āśvalāyana School relating to the Gṛhya rituals with elaborate details, namely –

पुण्याहवाचनम्, स्थालीपाकः, गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, विष्णुबलिः, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलः, उपनयनम्, ब्रह्मोदनम्, मेधाजननम्, उपाकर्म, उत्सर्जनम्, महा-नाम्नीव्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानम्, समावर्तनम्, विवाहः ।

81
VṚṢOTSARGAPADDHATI

Beginning :

श्रीगुरुभ्यो नमः ।

अथ शौनकोक्तवृषोत्सर्गविधिरुच्यते । तत्र वृषभलक्षणम् - जीवद्वत्सायाः पयस्विन्यायाः पुत्रं द्विहायनं त्रिहायनं वा नीलं बभ्रुं पिङ्गलं कृष्णं लोहितं श्वेतमेकवर्णमनेकवर्णं वा जीवन्मातृकं यथास-म्भवम् । यद्वा यूथमाच्छादचित्रितं वृषभमुत्सृजेत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

The work contains details relating to the sixteen saṁskāras compiled from various smṛtis. It pertains mainly to the Āśvalāyana school. The author states that he is giving here what is required for Prayoga as well as Nirṇaya on the basis of Jyotiṣa. He is the son of Cāyibhaṭṭa.

Digitized by Arya Samaj Foundation Chennai and eGangotri

A detailed table of contents is given in six folios at the beginning of the Ms.

67
YAJÑADĪPIKĀ

Beginning :

श्रीगुरुभ्यो नमः ।
विलिख्य चाभ्युक्ष्य करप्रमाणं भूमौ लिखेत् सैकतमृद्विरेखम् ।
तुर्याश्रमश्वत्थदलादिदिक्षु दलाष्टकं कोणचतुष्टयेषु ॥
सर्वत्र वसुधा मेध्या सशैलवनकानना ।
अथ विष्णुपदाक्रान्ता किमर्थं स्थण्डिलं कृतम् ॥

End :

वर्णत्रयं समुच्चार्य होकारान्ते ददाम्यहम् ।
तत्रायुष्याभिवृद्धिश्च ब्रह्मलोके महीयते ॥
यथा पङ्कनिमग्ना गौः पथि सर्वानपेक्षते ।
तथा मन्त्राहुतो ह्यग्निः सदस्यानवलोकते ॥

The name of the work is given in the margin of the first folio.

69
LOKOPAKĀRAKASAMANTRAPRAYOGA

Beginning :

श्रीगुरुभ्यो नमः । हरिः ओम् । सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु । सुमुहूर्तोऽस्तु ।
का भद्रा का नवमी कैव चतुर्थी कुतो व्यतीपातः ।
नरहरिचरणक्रीडा निघ्नन्ति सकलकलुषाणि ॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥
सर्वमङ्गलमाङ्गल्ये, शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
ओम् । नमो महद्भ्यो नम अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।
यजाम देवान्यदिशन् कवाममथायसः शं सभावृक्षि देवाः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

आचम्य । प्राणानायम्य । देशकालावनुकीर्त्य । श्रीमहाविष्णुप्रीत्यर्थं धर्मार्थकाममोक्षचतुर्विध-
Digitized by Arya Samaj Foundation Chennai and eGangotri
पुण्यपुरुषार्थसिद्ध्यर्थं समस्तमङ्गलावाप्त्यर्थं अमुककर्माख्ये कर्मणि शुद्ध्यर्थं वृद्ध्यर्थं ब्राह्मणैः सह स्वस्तिपुण्याहवाचनं करिष्ये इति सङ्कल्प्य ।

End :

आदौ तु कन्यावरणं मुहूर्त्तं निरीक्षणं दानमथाक्षतानाम् ।
आरोपणं मङ्गलकङ्कणं च माङ्गल्यसूत्रं नववस्त्रबन्धः ॥
प्रधानहोमस्तु करग्रहः स्याद् भ्रात्राप्यनुज्ञाप्य च लाजहोमः ।
प्रदक्षिणं स्याद् हृषदावरोहणं नताम्बरं ग्रन्थिविमोचनं च ॥
आरोपयेत् सप्तपदाद्विड्धा वरस्य कुम्भोदकसेचनं च ।
प्रधानहोमं मुखरोमकृन्तनं करं च बीजं च जलाभिषेकम् ॥
वस्त्राञ्जलिं कुण्डललेपनं च स्रुक्पादुकं छत्रसवेणुदण्डम् ।
मषीशिरोवेष्टनमूर्ध्वशाखाहोमं च कुर्याद्दशभिः समिद्भिः ॥
इष्टं च होमं त्वथ व्याहृतीश्च विष्टा च मौञ्जी च विसर्जनीये ।
समावर्तनश्लोकः ।

Colophon :

इति लोकोपकारकसमन्त्रप्रयोगे विवाहविधिः समाप्तः ।

Ms. 74 and 87 begin as :

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि केषांचिद्वृत्तिकारादिभाषितम् ॥
प्राणानायम्य सङ्कल्प्य परितः स्थण्डिलं शुचिः ।
अधिकं वेषुमात्रं वा गोमयेनोपलिप्य च ॥

The works give the mantras according to the Āśvalāyana School relating to the Gṛhya rituals with elaborate details, namely –

पुण्याहवाचनम्, स्थालीपाकः, गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, विष्णुबलिः, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलः, उपनयनम्, ब्रह्मोदनम्, मेधाजननम्, उपाकर्म, उत्सर्जनम्, महा-नाम्नीव्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानम्, समावर्तनम्, विवाहः ।

81
VṚṢOTSARGAPADDHATI

Beginning :

श्रीगुरुभ्यो नमः ।

अथ शौनकोक्तवृषोत्सर्गविधिरुच्यते । तत्र वृषभलक्षणम् - जीवद्वत्सायाः पयस्विन्यायाः पुत्रं द्विहायनं त्रिहायनं वा नीलं बभ्रुं पिङ्गलं कृष्णं लोहितं श्वेतमेकवर्णमनेकवर्णं वा जीवन्मातृकं यथास-म्भवम् । यद्वा यूथमाच्छादचित्रितं वृषभमुत्सृजेत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

ततो ब्राह्मणैराशिषो देया । ततो ब्रह्मणान् भोजयित्वा स्वयं भुञ्जीत । बन्धुभिः मित्रादिभिः सहितस्तिष्ठेत् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं यथोक्तविधिना यस्तु नीलं समुत्सृजेत् ।
सर्वसिद्धिमवाप्नोति यथा ते ब्रह्मचारिणः ॥

इत्यादि फलकथनं हेमाद्रौ एवं मन्तव्यम् ।

Colophon :

इति श्रीरामेश्वरभट्टसुतनारायणभट्टकृता वृषोत्सर्गपद्धतिराश्वलायनीया समाप्ता ।

83
VṚṢOTSARGAVIDHI

Beginning :

श्रीगुरुभ्यो नमः । शौनकोक्तवृषोत्सर्गः । वृष एव स च नित्यकामः ।
न करोति वृषोत्सर्गं सुतीर्थे वा जलाञ्जलिम् ।
न ददाति सुतो यस्तु पितु उच्चार एव सः ॥

उच्चारः पुरीषः ।

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

इति मात्स्यकौर्मोक्तेः ।

End : As in 85

Colophon :

इति श्रीरामेश्वरभट्टविरचिता आश्वलायनी वृषोत्सर्गपद्धतिः समाप्ता शौनकीये ।

The name 'Vṛsotsargavidhi' is given in the margin of the first folio.

97
ITIHĀSASAMUCCAYA

Beginning :

श्रीगुरुभ्यो नमः । वेदव्यासाय नमः । शुभमस्तु ।
जयति भगवान् कविऋषभः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलजनितं सेव्यममृतं जगत्त्रयं पिबति ॥

CC-0. Prof. Satya Vrat Shastri Collection.

पाराशर्यवचः सरोजममलं गीताख्यगन्धोत्कटं
Digitized by Arya Samaj Foundation Chennai and eGangotri
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद् भारतपङ्कजं कलिमलप्रध्वंसनं श्रेयसे ॥
जितमजिते भगवतो जलनिधिशयनेन जलधिवर्णेन ।
वस.... रणे रसातलपङ्काङ्कितगण्डतुण्डेन ॥
पुनरपि जितं भगवता हिरण्यकशिपो.... येन ।
कुलिशादपि कर्कशं कुवलयमिव कररुहैर्भिन्नम् ॥
कृष्णद्वैपायनं व्यासं विधि.... भुम् ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥
मतिमन्थानमाविध्य येन वेद.... ।
.... धिताय जनितो येन भारतचन्द्रमाः ॥
प्रायशो मुनयः सर्वे केवलात्महिते क्षमाः ।
द्वैपायनस्तु भग..... तोद्यतः ॥
स्तुत्यं तस्यापि किञ्चान्यद्येन लोकहितैषिणा ।
वेदा व्यस्ताः कृतं चापि महाभारतमद्भुतम् ॥
..... तस्यां दर्शयिष्यतः ।
श्रूयतां सिंहनादोऽयं ऋषेस्तस्य महात्मनः ॥
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥
एष प्रकृत्यैव यतो लोकः सत्को.... ।
धर्ममोक्षपरं तस्मात् करिष्येऽहं समुच्चयम् ॥

End :

तस्मात् त्वमपि राजेन्द्र श्रद्धया परया युतः ।
गङ्गामुपास्य यत्नेन ततः सिद्धिमवाप्स्यसि ॥
इतिहासमिदं पुण्यं गङ्गामाहात्म्यमुत्तमम् ।
यः पठेच्छृणुयाद्वापि स याति परमां गतिम् ॥

Colophon :

इति श्रीमदितिहाससमुच्चये गङ्गामहिमा नाम पञ्चमोऽध्यायः ।

125
ANANTAŚAYANAMĀHĀTMYA

Beginning :

हरिः श्रीगणपतये नमः । श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः ।
श्रीसरस्वत्यै नमः । अविघ्नमस्तु ।

CC-0. Prof. Satya Vrat Shastri Collection.

अनन्तभोगपर्यङ्के शयानं क्षीरसागरे ।
नौमि सुन्दरराजं तं श्रीवराहतनुं हरिम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपुण्ये नैमिशारण्ये मुनयः शौनकादयः ।
सत्रं समासत समाः सहस्रं हरितुष्टये ॥
प्रातः सवनहोमान्ते कदाचिच्छौनकादयः ।
सत्कृतं सूतमासीनं पप्रच्छुरिदमुत्सुकाः ॥
व्यासशिष्य महाप्राज्ञ सर्वशास्त्रविशारद ।
शृण्वतामुत्सुकानां हि एतदाख्याहि नः शुभम् ॥
अनन्तशयनं नाम दक्षिणाम्बुनिधेस्तटे ।
यत्र शेते स्वयं विष्णुर्दर्शनान्मुक्तिदो नृणाम् ॥
अनन्तभोगपर्यङ्के श्रीभूमीलानिषेवितः ।
इत्युक्तं तु त्वया पूर्वं ब्रह्मन्नाख्यानविस्तरे ॥
पृच्छामहेऽद्य तच्छ्रोतुं परं कौतूहलं हि नः ।

End :

अनन्तपद्मनाभस्य चरितं महदद्भुतम् ।
श्रुतं भवद्भिरखिलं कुशलानि भवन्तु वः ॥
इत्युक्तास्ते तदा विप्रा ह्यानन्दाश्रुपरिप्लुताः ।
सूतं पौराणिकं सर्वे पूजयांचक्रुरञ्जसा ॥
श्रुतमेतत् त्वया सूत पुण्यं हरिकथामृतम् ।
कृतार्थाः स्मश्चिरं जीव हरिलीलामृतप्रदः ॥
इति तं नन्दयित्वाथ ते च सर्वे महर्षयः ।
माध्याह्नसवनायाशु प्रोद्यतास्तेऽभवन्मुदा ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मगोलविस्ताराख्ये अनन्तशयनमाहात्म्ये एकादशोऽध्यायः ।
अनन्तशयनमाहात्म्यं सम्पूर्णम् । श्रीपद्मनाभाय नमः ।

लिखितं पद्मनाभस्य चरितं परमद्भुतम् ।
अनन्तपद्मनाभस्य नारसिंहस्य तुष्टये ॥

Date : 16th Kanni 1016 M.E.

The work gives the legendary story of the consecration of Lord Śrīpadmanābha in the Anantaśayana temple in Trivandrum.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

127
ĀNANDAKĀNANAMĀHĀTMYA

Beginning :

श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः । श्रीलक्ष्मीवेङ्कटेशाय नमः ।

शौनक उवाच -

सूत सूत महाप्राज्ञ दैवज्ञ वदतां वर ।
रहस्यं श्रोतुमिच्छामो श्रीमदानन्दकाननम् ॥
केचिद्वदन्ति कल्याणं विष्णोरायतनं महत् ।
अपरे शौवमित्येतच्छिन्धि नः संशयं सताम् ॥

सूत उवाच -

शृणु ब्रह्मर्षिवर्य त्वं रहस्यं पापनाशनम् ।
गुह्याद्गुह्यतमं विष्णोः क्षेत्रं विष्णुजनप्रियम् ॥
अयमेव पुरा प्रश्नः कृतः पाराशराग्रतः ।
पैलादिभिर्मुनिगणैः ऋभुहंसैश्च योगिभिः ॥
ब्रह्मेशाद्यैः सुरगणैर्मेरुपर्वतवासिभिः ।
भगवन् श्रोतुमिच्छामो गुह्यमेतन्महोदय ॥

End :

व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥
नित्यं नैमित्तिकं कृत्वा कार्तिके पापशोधने ।
गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥

Colophon :

इति श्रीवायुपुराणे लक्ष्मीसंहितायामानन्दकाननमाहात्म्ये प्रथमोऽध्यायः ।

(folio 36)

128
KĀRTIKAMĀHĀTMYA

Beginning :

हरिः । श्रीवेदव्यासाय नमः ।

ब्रह्मोवाच -

कार्तिकस्य च मासस्य माहात्म्यं वद मे प्रभो ।
कथं च कार्तिके मासि स्नानदानादिकाः क्रियाः ॥
कर्तव्याः किं फलं तस्य तत्सर्वं वद विस्तरात् ।

CC-0. Prof. Satya Vrat Shastri Collection.

हंस उवाच -

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधु पृष्टं त्वया ब्रह्मन् लोकानुग्रहसिद्धये ।
कार्तिकस्य च मासस्य वक्ष्ये माहात्म्यमुत्तमम् ॥
कार्तिके मासि सम्प्राप्ते प्रातरुत्थाय चादृतः ।
अरुणोदयवेलायां शौचमाचमनं तथा ॥
कृत्वा यथोक्तविधिना धृत्वा चैवोर्ध्वपुण्ड्रकम् ।
पश्चिमे जागरं कृत्वा स्नानं कुर्याद्बहिर्जले ॥

End :

इत्थं हंसेनोपदिष्टं मासमाहात्म्यमुत्तमम् ।
नारदं ग्राहयामास ब्रह्मपुत्रं जितेन्द्रियम् ॥
स उवाच मुनीनां तु नैमिषारण्यवासिनाम् ।
एवं परम्पराप्राप्तं मासमाहात्म्यमुत्तमम् ॥
मानुषे ख्यातिमापन्नं निखिलाभीष्टदायकम् ।
ये च शृण्वन्ति सततं ये पठन्ति च मानवाः ॥
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ।

Colophon :

इति श्रीमत्पाञ्चरात्रागमे भारद्वाजसंहितायां कार्तिकमाहात्म्ये हंसब्राह्मणसंवादे षोडशोऽध्यायः ।

Date : 10th Vrischikam 1016 M.E.

140
YEŚUKRISTUMĀHĀTMYA
(With Malayāḷam Commentary)

Beginning :

श्रीयेशुक्रिस्तुमाहात्म्यम् ।
जगच्चोक्तुर्गुणान् गातुमुद्यतस्तनुवागहम् ।
सार्थां मनोहरां वाणीमर्थये परमेश्वरम् ॥

Lokarakṣitāvinṭe guṇaṅṅaḷe vācālanalleṅkilum varṇippān tuṭaṅṅukayāl artham kūṭiya manoharavākkukaḷe nalkuvān daivatte prārthikkunnu.

कश्चिद्विदेशशास्त्रज्ञं विद्वांसं बहुदर्शिनम् ।
सत्यार्थी तरुणः कश्चिदुपसृत्येदमब्रवीत् ॥
भो आर्य कस्यचित्संज्ञं ख्रिष्ट्वाख्यस्य महागुरोः ।
परं पारं मयाश्रावि मुखात्तस्यानुयायिनाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधपञ्चाशदब्दभ्यः श्रीखिष्टस्यागतैः पुरा ।
आचार्यो दानियेलाख्यः प्रोचे कालं तदागतैः ॥
स्वदूतो गाब्रियेलाख्यस्तत्समीपे ह्युपस्थितः ।
तमीश्वरप्रियं भव्यां वार्तामेवमदर्शयत् ॥

176
KOKASMṚTI

Beginning :

श्रीसरस्वत्यै नमः ।
ध्यायेद्गोपालकृष्णं सुरतरुवसनं रत्नसिंहासनाग्रे
वेणुं पाणिद्वयेनाधरमणिसुधया पूरयन्तं वसन्तम् ।
बिभ्राणं शङ्खचक्राङ्कितकरयुगलं सत्यभामासमेतं
रुक्मिण्या शोभमानं गवयकरिमृगैर्गोपिकास्वर्चिताङ्घ्रिम् ॥

ध्यायेन्मल्हारिदेवं कनककरिनिभं मालसाभूषिताङ्गं
श्वेताश्वाखण्डचर्मं विबुधबुधगणैः सेव्यमानं सदार्यैः ।
युक्ताङ्घ्रिं तैत्यमूर्धां कमलविलसितं नित्यपूर्णाभिपात्रं
नित्यं भक्तेषु तिष्ठेत् स्वगणपरिवृतं नित्यमोङ्कारगम्यम् ॥

मूलमन्त्रः - ओं ह्रां ह्रीं क्रों एह्येहि करतलकरपृष्ठाभ्यां स्वाहा ।

लग्ने चरे सूर्यकुजार्किवारे रिक्तातिथौ चन्द्रबले च हीने ।
चित्राधानिष्ठाश्विनिवह्निधिष्ठ्ये स्नानं हितं रोगविमुक्तजन्तोः ॥

End :

जातस्य पञ्चमदिने शुभदे मुहूर्ते पञ्चायुधाभरणधारणमिष्टमाहुः ।
नाभिप्रदेशपरिलम्बसुवर्णसूत्रं कण्ठं शिशुग्रहनिवारणकैश्च युक्तम् ॥
तमर्वन्तं नसानिसिमित्याशीर्वचनं गृह्णीयात् । कायेन वाचा ।

The title of the work is given in the list of works given at the beginning of the codex.

186
VYAVAHĀRAMĀLA
(With Malayāḷam Commentary)

Beginning :

हरिः श्रीगणपतये नमः ।
नमस्ते नरसिंहाय भक्तानुग्रहकारिणे ।
अजाय बहुरूपाय सर्गस्थित्यन्तकारिणे ॥

CC-0. Prof. Satya Vrat Shastri Collection.

ennatu. vyavahāramālayenna granthatte unṭākkaṇam ennu manassil sankalpiccu ā granthattinu vighnam varāte granthasamāpti varēṇṇunnatinnu janikku adhistadevatayāyittuḷḷa narasiṁhasvāmiye vannikkunnu. bhaktanmārkku anugraham ceyyunnavanāyum jananamillattavanāyum lokānugrahattināyiṭṭu anekam avatāraṅṅaloṭu kūṭiyavanāyum lokattinṭe sṛṣṭiyum rakṣayum saṁhāravum ceyyunnavanāyum narasiṁhasvarūpanāyum irikkunna aṅṅekkāyikkoṇṭu namaskāram.

Digitized by Arya Samaj Foundation Chennai and eGangotri

End :

एवं सर्वानिमान् राजा व्यवहारान् समापयन् ।
त्रिलोक्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

iprakāram dharmattil pravartticcavanāyum duṣṭanmāre daṇḍikkunnavanāyum irikkunna rājāvinu ihalokattil valutāyittulla yaśassum vannu svargavāsavum vannu sakalamānavyavahāraṇṇaḷeyum nyāyaprakāram tīrttuvarunna rājāvinu sakalamāna pāpavimocanam vannu uttamamāyiṭṭuḷḷa gatiyum varum.

Colophon :

इति व्यवहारमाला समाप्ता ।

189
ŚRĀDDHANIRṆAYA

Beginning :

श्रीगणपतये नमः । अथ पार्वणश्राद्धनिर्णयः ।

सायन्तन्येपरत्र चेन्मृततिथिः सैवाब्दिके मासिके
ग्राह्या सा ह्यपराह्णयोर्यदि तदा यत्राधिका संस्मृता ।
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत् तद्वये
पूर्वैव त्रिमुहूर्तजातसमये नो चेत् परो वोचिता ॥

End :

कार्यं महालयश्राद्धं यथाशक्त्यनुरूपतः ।
न दद्याद्यदि तत्रापि यावद्वृश्चिकदर्शनम् ॥
वृश्चिके समनुक्रान्ते यो न दद्याद्गृहाश्रमी ।
निराशाः पितरो यान्ति शापं दत्वा निजालयम् ॥

195
SAṀNYĀSAPADDHATI

Beginning :

श्रीगणेशाय नमः । अथ संन्यासपद्धतिप्रारम्भः ।

वसिष्ठः -

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽपि वा पुनः ।
विरक्तः सर्वकामेभ्यः परिव्राजं समाश्रयेत् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
तावन्न्यासोऽग्निहोत्रं च कर्तव्यं च कलौ युगे ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

End :

एवं व्रती च सर्वसमाराधनं कुर्यादकृते तेषां प्रेतत्वादिकं नास्ति ।

Colophon :

इति पुरुषोत्तमतीर्थकृता परमहंससंस्कारपद्धतिः समाप्ता ।

197
SMṚTIRATNĀKARA

Beginning :

श्रीगणेशाय नमः । अविघ्नमस्तु ।

नत्वा नारायणं लक्ष्मीं ब्रह्मवायू सरस्वतीम् ।
भारतीं गरुडं शेषं रुद्रं शक्त्यादिकान् क्रमात् ॥
विदुरस्य पुरे वासी विट्ठलः केशवात्मजः ।
आलोक्य स्मृतिवाक्यानि संक्षेपेण करोम्यहम् ॥
स्मृतिरत्नाकरं नाम्ना वक्ष्ये तत्राह्निकादिकम् ।
आधानादिश्मशानान्तं संस्कारान् षोडशैव हि ॥

End :

लग्नाच्च सप्तमस्थाने मन्दो भौमः सितो रविः ।
आत्मानं पितरं भ्रातॄन् मातरं हन्त्यसंशयम् ॥
केन्द्रे चैणा....

The work is a compendium from various sources. The author Viṭṭhala is the son of Keśava.

199
ĀŚAUCAṆIRNAYA

Beginning :

श्रीगुरुभ्यो नमः । अथ आशौचनिर्णयो लिख्यते ।

'आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्ध्वं प्रसूतिः स्याद्' इति । तत्र स्रावे आद्य-मासत्रये मातुस्त्रिरात्रमाशौचम् । उपरि आ षष्ठमासं समसंख्याकदिनमाशौचम्, चतुर्थे चत्वारि, पञ्चमे पञ्च, षष्ठे षडित्यर्थः । सपिण्डानां स्नानमात्रेण शुद्धिः स्रावे, पाते तु त्रिरात्रम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

प्रक्रान्तप्रायश्चित्तानामाशौचं नास्ति । पूर्वप्रवृत्तचौलोपनयनादिसंस्कारस्य यज्ञदीक्षाप्रतिष्ठामारभ्य.... उत्सर्गादिष्वप्येवमिति ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

Colophon :

इति श्रीभट्टोजिदीक्षितकृताशौचनिर्णयः समाप्तः ।

200
ĀŚAUCANIRṆAYA
(With Commentary)

Beginning :

श्रीगणपतये नमः । श्रीकृष्णाय नमः । श्रीवेदव्यासाय नमः ।
अथानेकर्षिवाक्यानि सङ्गृत्यादाय केवलम् ।
सङ्गृह्य कौशिकादिभ्यो लिखाम्याशौचनिर्णयम् ॥
अथपदं मङ्गलाचारः । ग्रन्थादौ मङ्गलाचरणं निर्विघ्नपरिसमाप्तिकारणमिति श्रुतेर्विद्यमानत्वात् ।
अनेकऋषिवाक्यानि सङ्गृत्यादाय सङ्गृह्याशौचनिर्णयं केवलं लिखामि ।
आशौचं द्विविधं प्रोक्तं जातकं मृतकं तथा ।
अल्पं चैवाधिकं चेति तत्पुनर्द्विविधं स्मृतम् ॥
आशौचं जातमृतभेदाद् द्विविधमुक्तम् ।

End :

व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
भक्तिश्रद्धाविहीनस्य भस्मातं सूतकं भवेत् ॥

Colophon :

इति षडशीत्याः व्याख्यानं समाप्तम् ।

'Ṣaḍaśīti' is an alternative title of the work. It deals with all kinds of pollution. Some Mss. in other places seem to be read 'Kauśikādityo' for 'Kauśikādithyo' and, on that basis, some take the author to be Kauśikāditya.

202
ĀŚAUCASAṄGRAHA
(With Commentary)

Beginning :

श्रीगुरुभ्यो नमः ।
नत्वा गणेश्वरं देवं शारदां गुरुमात्मनः ।

CC-0. Prof. Satya Vrat Shastri Collection.

आशौचसङ्ग्रहत्रिंशच्छ्लोक्या व्याख्यां करोम्यहम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र स्मार्तकर्ममुल्लङ्घ्य प्रसिद्धक्रममनुसरन् गर्भविपत्तिनिमित्तमाशौचं प्रतिपादयति -

षण्मासाभ्यन्तरे तु स्वपुरुषनिहिते गर्भमात्रे विनष्टे माता तन्माससंख्यासमदिनमशुचिः स्नानशुद्धाः सपिण्डाः ।

अन्त्ये मासद्वये तु त्रिदिनमशुचयोऽतः परं सूतिवत् स्या-
च्चातुवर्ण्यस्य तुल्यं भवति वयसि यत्रोच्यते शौचमात्रम् ॥

अस्यायमन्वयः । षण्मासाभ्यन्तरे मध्ये स्वपुरुषनिहिते न्यस्तगर्भमात्रे अपूर्णविषये गर्भे विनष्टे माता जननी तन्माससंख्यासमदिनं तेषां मासानां गर्भधारणादारभ्य प्रत्येकं संख्यातदिनानि यस्मिन् काले त इति समासः । तथा चायमर्थः गर्भधारणमासमादिं कृत्वा यन्मासाभ्यन्तरे गर्भो विनष्टः तन्मा-ससंख्यासमदिनानीति ।

End :

तिलानि च स्पृष्ट्वा दृषदि पदं न्यस्य सर्वे गृहं प्रविशेयुरिति सम्बन्धः । तथा च स्मृतिः -

''इति संस्मृत्य गच्छेयुर्गृहं बालपुरस्सराः ।
विदस्य निम्बोपत्राणि नियता द्वारवेश्मनः ॥
आचम्याग्न्यादि सलिलं गोमयं गाश्च सर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥''

इति ।

Colophon :

इति सव्याख्या त्रिंशच्छ्लोकी समाप्ता ।

Date :

प्लवाब्दे पुष्यमासे शुक्लपक्षे एकादश्यां शनिवारे लिखितमिदं पुस्तकम् ।

Scribe :

रामकृष्णेन लिखितमिदं सूतकनिर्णयम् ।

The work has a title Triṁśacchloki also on the basis of the number of verses in it. Bopadeva is considered to be its author.

204
KARMASIDDHĀNTA

Beginning :

श्रीगुरुभ्यो नमः । श्रीविट्ठलाय नमः । कर्मसिद्धान्तः ।
श्रीविट्ठलं नमस्कृत्य मध्वहृत्कमले स्थितम् ।
संक्षेपात् कर्मसिद्धान्तं करोति पुरुषोत्तमः ॥
ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
स्मृत्वा नारायणं देवं शरण्यं शरणं व्रजेत् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्वकालमेके विवाहम् । सूत्रकारेणोक्तम् ।

'ब्रह्मकङ्कणहस्ते चेन्न दोषो न च सूतकम्

यावन्नोत्सर्जितं तावत्पर्यन्तम्'

इति वाराहे ।

Colophon :

इति कर्मसिद्धान्तग्रन्थः समाप्तः ।

The work deals with the daily routine of Brahmins, the Madhvas in particular. Mss. 209 and 210 contain a detailed table of contents of the work.

224
TṚCĀKALPAVIDHI

Beginning :

श्रीगुरुभ्यो नमः ।

श्रीसूतः -

भक्त्या कृष्णं नमस्कृत्य ह्यर्जुनः पर्यपृच्छत ।
तृचामन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यहं प्रभो ॥

श्रीकृष्णः -

परं व्रतं प्रवक्ष्यामि शृणु पार्थ ह्यनन्यधीः ।
वैदिकं सौरमन्त्रस्य विधिं सर्वरुजापहम् ॥

End :

गायत्र्या सौरमन्त्रैर्वा तृचामन्त्रैर्विशेषतः ।
व्याहृत्या वापि होतव्यं सूर्यस्य प्रीतये पुनः ॥
होमं चार्घ्यं दशांशेन तद्दशांशेन तर्पणम् ।
भोजनं तद्दशांशेन तद्दशांशेन मार्जनम् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे तृचाकल्पविधानं सम्पूर्णम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning :

श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः । अविघ्नमस्तु । श्रीमद्विजयेन्द्रगुरुभ्यो नमः । श्रीमदानन्द-तीर्थभगवत्पादाचार्येभ्यो नमः । अस्मत्कुलपतये कौसल्यानन्दनाय सीतापतये श्रीरामाय नमः । हरिः ओम् ।

साधुचातकमेघाय वेदपङ्कजभानवे ।
बोधचम्पकभूषाय वेदव्यासाय ते नमः ॥
अगण्यं सगुणाम्भोधिं दोषगन्धविवर्जितम् ।
मुमुक्षुसेव्यं श्रीरङ्गपतिं नौमि रमाश्रयम् ॥
विघ्नवारणपञ्चास्यं सदाभीष्टफलप्रदम् ।
वरदं योगनृहरिं वन्दे सज्जनपूजितम् ॥
यत्पदे देवतावन्द्ये यद्दत्तं हरितुष्टिदम् ।
तमहं श्रीमदानन्दतीर्थाचार्यं भजेऽनिशम् ॥
तात्पर्यचन्द्रिका न्यायामृतं सत्तर्कताण्डवम् ।
यच्चित्ताब्धेरभूद् व्यासतीर्थाख्यं नौमि तं गुरुम् ॥
सदाचारादिपूतान्ताः शमादिगुणसंयुताः ।
स्वोत्तमानुग्रहोपेतास्तेभ्यः सद्भ्यो नमो नमः ॥
श्रुतिस्मृतिपुराणादीन् समालोक्य यथामति ।
पञ्चसंस्कारविषये सङ्ग्रहः क्रियते मया ॥

End :

सङ्गृहीतमिदं शास्त्रं वैष्णवं ज्ञानसाधनम् ।
तेन तुष्टोऽस्तु नृहरिर्वरदो योगसंस्थितः ॥
न व्यत्यासो न वा दोषो द्रष्टव्यः सद्भिरत्र हि ।
अभिधेयपराः सन्तो नाभिधानपरा यतः ॥

रत्नैरद्भुतदीधितिप्रणिहितां सत्स्वान्तसन्दोहकै-
स्तापाद्यै रचितां हि रङ्गपतिना तीर्थाख्यसद्वृत्तिना ।
श्रीमद्व्यासयतीन्द्रशिष्यतनुतां मालां गले बिभ्रतु
श्रीनारायणकिङ्करो हरिवशीकारक्षमामादरात् ॥
श्रीमहि..... लसन्निधा.....
ग्रन्थं यः पठति शृणोति सकलस्मृत्युक्तमार्गानुगम् ।
भक्त्या तत्कथितक्रियास्तु कुरुते यो वै लिखत्यादरात्
तस्मै श्रीरमणस्तनोति विमलामानन्दसत्सन्ततिम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Colophon :

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वैष्णवधर्मशास्त्रे पञ्चसंस्कारसङ्ग्रहे यागसंस्कारः समाप्तः। ग्रन्थः पञ्चसंस्कारनामकस्तु समाप्तः। श्रीवरदयोगनृसिंहार्पणमस्तु। श्रीमद्विजयेन्द्रतीर्थपूज्यपादानां शिष्यस्य यदुराजतीर्थस्य पञ्चसंस्कारसङ्ग्रहः।

Date :

पिङ्गलसंवत्सरे आषाढमासे शुक्लपक्षे अष्टम्यां गुरुवासरे।

Scribe :

अनन्तभट्टः

The work deals with the fine saṁskāras of the Vaiṣṇavas (Mādvas), namely Tāpa, Puṇḍra, Nāma, Mantra and Yāga laid down in the verse attributed to Sanaka –

तापादिपञ्चसंस्कारसंस्कृता वैष्णवाः स्मृताः।
तापः पुण्ड्रस्तथा नाम मन्त्रो यागस्तु पञ्चमः॥

and explained as –

तप्तचक्रादिना तप्तो यः स ताप इतीरितः।
तस्यैव नामकरणं नाम इत्यभिधीयते॥
मन्त्रमष्टाक्षरं प्रोक्तं पुण्ड्रमूर्ध्वमुदाहृतम्।
यागो ह्यभ्यर्चनं विष्णोः पञ्चैते देशिकाः स्मृताः॥

All these are given in great detail with incidental elaborations such as Sālagrāmalakṣaṇa, Pūjāvidhi, Dīpotsava etc.

282
KARMAVIPĀKAPRĀYAŚCITTASUDHĀNIDHI

Beginning :

श्रीगुरुभ्यो नमः। अविघ्नमस्तु। शुभमस्तु।
चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम्।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु॥
अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः।
यत्कीर्तिमौक्तिकादर्शे त्रिलोकी प्रतिबिम्बिता॥
अस्य मन्त्रिशिरोरत्नमस्ति मायणसायणः।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिवीम्॥

CC-0. Prof. Satya Vrat Shastri Collection.

तेन मायणपुत्रेण सायणेन मनीषिणा ।
Digitized by Arya Samaj Foundation Chennai and eGangotri
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावता ॥
कृतानां विविधानां च ज्ञानतोऽज्ञानतोऽपि वा ।
इह रोगनिदानानां कर्मणा निष्कृतिं ब्रूते ॥

End :

एवमादिविधानेन दानहोमजपादिना ।
दारिद्राख्यान्महारोगान्मुक्तो मर्त्योऽपि जायते ॥
तस्मादवश्यं कर्तव्यं दानहोमादिकं नरैः ।
दारिद्र्यरोगाभिभूतैस्तस्माद्रोगात् प्रमुक्तये ॥

Colophon :

इति कर्मविपाकप्रायश्चित्तसुधानिधौ सायणकृतौ सकलग्रन्थार्थसारभूते दारिद्र्यरोगप्रतिक्रिया नाम द्वात्रिंशत्प्रकरणम् ।

The Colophon in 289 reads –

इति श्रीमाधवभोगनाथसहोदरस्य मायणनन्दनस्य सायणाचार्यकृतौ कर्मविपाकप्रायश्चित्तसुधानिधिः समाप्तः ।

The work deals with the Vaidic expiatory rites for the cure of chronic diseases believed to be caused by the sins incurred in previous lives.

291
KARMAVIPĀKAMAHĀRṆAVA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ।

अथ रोगनिबर्हणानि । तत्र क्षयरोगहराणि । क्षयरोगनिदानमाह याज्ञवल्क्यः । तन्निवृत्त्यर्थं षडब्दप्रायश्चित्तं कुर्यात् ।

End :

मेषग्रहोद्देशेन बलिदानमन्त्रमाह-
प्रगृह्णीष्व बलिं चेमं मेषग्रह महाग्रह ।
आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबल ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Colophon :

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति कर्मविपाकमहार्णवः समाप्तः ।

The expiatory cure for about 250 diseases affecting the different part of the body is dealt with.

293
KARMAVIPĀKĀRKA

Beginning :

श्रीगणाधिपतये नमः । अविघ्नमस्तु । शुभमस्तु ।

दिवाकरपदद्वन्द्वं फलद्वन्द्वप्रदायकम् ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहम् ॥

यतः सर्वं विश्वं भजति जनिसत्तालयमिदं
महात्मा सर्वेषां स्थिरचरजडानामपि विभुः ।
तमेतं भास्वन्तं विधिहरिमहेशानवपुषं
नमस्यामः कामं परमकमनीयं सुकृतिनाम् ॥

लोकाभिरामं श्रीरामं भक्तानां कामदं परम् ।
नीलोत्पलदलश्यामं स रामं तं भजामहे ॥

भाट्टे भट्टो द्वितीयः श्रुतिनिचयविदामद्वितीयोऽग्रगानां
भट्टः श्रीनीलकण्ठो निजकुलजलधेरुद्गतः पूर्णचन्द्रः ।
तत्सूनुः शङ्कराख्यस्तदमलचरणद्वन्द्वमालम्ब्य कुर्वे
प्राचीनैनस्तमिस्रं दलयितुमखिलं कर्मपाकार्कमेतम् ॥

तत्रादौ कर्मविपाकशब्दार्थः । यद्यपि लोके कर्मशब्दः सुकृतदुष्कृतयोः साधारणः तथाप्यत्र दुष्कृतस्यैव निरूपणीयत्वेन तत्रैव पर्यवस्यति ।

End :

मेषकुक्कुटमांसं च पायसं सक्तवस्तथा ।
रुधिरं च हिरण्यं चेत्येते मूले वटस्य हि ॥
विनिक्षिपेदर्धरात्रे रक्तवस्त्रादिभिग्रहम् ।
अभ्यर्च्य वक्ष्यमाणेन मन्त्रेणानेन सम्मतः ॥
बलाधीश स्कन्दग्रह रक्तमाल्याम्बरप्रिय ।
प्रगृह्णीष्व बलिं चेमं पूजाभिः सह तुष्टिमान् ॥
इति रीत्यन्तरेण स्कन्दग्रहहरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Colophon :

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति श्रीभट्टनीलकण्ठात्मजभट्टशङ्करकृतौ कर्मविपाकार्के प्रजाग्रहादिग्रहहराणि । इति कर्मविपाकार्कः समाप्तः ।

356
MAHĀRṆAVA

Beginning :

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ॥
प्रवालादिप्रस्थद्युति निचयपर्यायवपुषे
नमो विघ्नश्रेणीविदलनविनोदाय महते ।
जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रणत फलसिद्धिप्रदभुवे ॥
यदिन्दिरानाथपुरन्दराद्यैराराधितं भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणारविन्दं वन्दामहे मत्कुलदेवतायाः ॥

आसीदसीमगुण.... म्बुराशा-
बुद्यत्प्रभूतशुभकीर्तिनयप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसन्निविष्टः
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥

तस्यात्मजोऽथ हरिपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः ।
दानेन यः सुकृतिनां क्षिपति स्म दैन्यं
सैन्यं च वैन्यसदृशः प्रतिभूपतीनाम् ॥

सुतोऽस्य जातः सुकृतोन्नतस्य कश्चित् (श्रिया) तत्सदृशो बभूव ।
यमात्मनस्तुल्यमवेक्ष्य तातो नाम्ना हरीपश्र (?) इति व्यधत्त ॥

बन्धच्छिदा बिरुदकीर्तिमथान्वितार्थां
कृत्वा परत्र च तथैव विधातुमिच्छुः ।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद् यः ॥

अस्यात्मजः श्रीमदनेति.... रूपेण च सङ्गतार्थः ।
रोषारुणे चक्षुषि यद्विपक्ष.... रूढत्वमवाप्तकामः ॥

पुत्रेषु सत्स्वपि कलत्रयुगेऽथ तस्य
पुत्रौ जगत्रयसिसृत्वरकीतिपूरौ ।

CC-0. Prof. Satya Vrat Shastri Collection.

....प्रियावतितरां प्रथमप्रसूतौ
Digitized by Arya Samaj Foundation Chennai and eGangotri
नीतौ महोन्नतिमनल्पगुणौ....॥

अप्रतिमल्लः पृथ्व्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मान्धातृगुणो मान्धाता गीयते जगति ॥
सोऽयं सुकृतविधाता रिपुकुलजेता तनोति मान्धाता ।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महार्णवं नाम ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरार्यपरितः श्रीवेदिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्तमते नये च स पदे वाक्ये कृती वर्धते ॥

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्तं तेषां मुकुरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य फणितिः ॥

श्रुतिस्मृतिपुराणानि समालोक्य यथामति ।
निबध्यते समानेन निबन्धोऽयं महार्णवः ॥

दुष्कर्मपाकजनितामयकर्शितानां सत्कर्म शर्मकृदित्युदितं मुनीन्द्रैः ।
तत्सङ्गजातमितरोक्तिविधानपेक्षं वक्ष्यामि रोगनिखिलार्त्तिनिबर्हणाय ॥

तत्र तावद्वक्ष्यमाणसकलकर्मोपयोगित्वेन कर्मविपाकरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेकयुक्तैः द्वादशवार्षिकादि प्रायश्चित्तव्याधिप्रकृतिदानादि कर्तव्यम् ।

End :

अथ लवणादानमन्त्रः -

यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ।
शम्भोः प्रीतिकरं नित्यमतः शान्तिं प्रयच्छ मे ॥

इति दशदानमन्त्राः ।

पापानां परिपाकस्य शान्तिकर्मविवक्षया ।
उक्तानि परिभाषायामुपयुक्तान्यशेषतः ॥

महार्णवाख्ये महति प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य ।
सत्कर्ममाणिक्यगणेनपूर्णे पूर्णस्तरङ्गः खलु सप्तमोऽत्र ॥

Colophon :

इति श्रीपण्डितपारिजातकठोरमल्लेत्यादिबिरुदराजि विराजमानश्रीमदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाके सप्तमस्तरङ्गः परिभाषाखण्डश्च समाप्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

The author Māndhātā is the son of Madanapāla. He gives his genealogy in the introductory portion of the work. There is close similarity between this work and the Madanamahārṇava published in the Gaekwad Oriental Series, Baroda.

Digitized by Arya Samaj Foundation Chennai and eGangotri

375
ŚĀNTIPADDHATI

Beginning :

श्रीगणेशाय नमः ।

...धर्मस्योक्तदिशा.... सप्रमाणतः ।
मत्तातपादरूपेण जातो यस्तं हरिं भजे ॥
श्रीरामेश्वरभट्टानां नप्त्रा काश्यपगोत्रिणा ।
श्रीसिद्धभट्टपुत्रेण नरसिंहेन सादरम् ॥
तातपादाम्बुजं नत्वा.... वाजसनेयिनाम् ।
मूलादिशान्तिकर्तृणां सर्वाभीष्टफलप्रदा ॥
साधूनां सुखबोधाय तन्यते शान्तिपद्धतिः ।
तेन श्रीभगवान् विष्णुः प्रियतां मे जनार्दनः ॥
ग्रन्थानालोक्य बहुधा क्रियते सङ्ग्रहस्ततः ।
स्वकल्पितत्वशङ्कात्र न कार्या पण्डितैरतः ॥

तत्र तावदिह शान्तिपद्धतौ त्रैवर्णिकानामधिकारः । शूद्रादीनां तु वैदिकमन्त्राभावात् पुराणमन्त्रेष्वधिकारः ।

End :

ब्रह्मानुराधाश्विनिसोमभेषु हस्तानिलाखण्डलवासरेषु ।
विश्वार्यमक्षौत्तिरभाद्रभेषु वाराङ्गनास्नानविधिः प्रदिष्टः ॥

उद्दिष्टा तु द्विजातीनां रजः स्त्री यदि पश्यति ।
उपवासमथादिष्टं ऊर्ध्वोद्दिष्टं त्र्यहं त्यजेत् ॥
विष्णोर्योनिं जपेत् सूक्तं योनिं स्पृष्ट्वा त्रिभिर्व्रती ।
गर्भाधानं ततः कुर्यान् सुपुत्रो जायते ध्रुवम् ॥

The author Narasiṁha is the son of Siddhabhaṭṭa and belongs to Kāśyapagotra.

CC-0. Prof. Satya Vrat Shastri Collection.

378
ŚĀNTISAMUCCAYA

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning :

श्रीगुरुभ्यो नमः । अथ ऋतुशान्तिरुच्यते । प्रतिपद्यां चतुर्थ्यां तु षष्ठ्यामष्टम्यां नवम्यां द्वादश्याममावास्यां प्रथमार्तवदर्शनाद् दुषिता परिहीना दुष्टचारिणी विधवा भवेत् । तद्दोषशमनार्थाय शान्तिं कुर्याद्विचक्षणः ।

End :

ततः पुष्पाञ्जलिं दत्वा यजमानः समाहितः
उद्वासनान्तं कुर्वीत अभिषेकं च कारयेत् ॥
बृहस्पतेति मन्त्रेण साधिपत्याधिदेवते ।
दुर्गानवग्रहाद्यैश्च लोकपालाष्टकैः.... ॥

The work gives an account of various kinds of expiatory rites collected from various sources like Padmapurāṇa, Nirṇayasindhu and Śaunakīya. The following are the Śāntis dealt with :

ऋतुशान्तिः (तिथिः - प्रतिपद्, चतुर्थी, षष्ठी, अष्टमी, नवमी, द्वादशी, अमावास्या., वारः - मन्दः, भानुः, भौमः., नक्षत्रम् - भरणी, कृत्तिका, आर्द्रा, पुनर्वसुः, आश्लेषा, मघा), प्रथमदन्तशान्तिः, ऊर्ध्वदन्तजननशान्तिः, पल्लीपतनशान्तिः, श्वानशान्तिः, ग्रहशान्तिः, त्रिपादनक्षत्रशान्तिः, दर्शजननशान्तिः, पकनक्षत्रशान्तिः, वायसप्रवेशशान्तिः, गण्डान्तशान्तिः, षष्टिपूर्तिशान्तिः, वल्मीकशान्तिः, कदलीशान्तिः, ग्रहणे प्रसूतिशान्तिः, स्त्रीणां मस्तके वायसस्पृष्टशान्तिः, गुरुशान्तिः ।

470
VRATĀRKA

Beginning :

श्रीगुरुभ्यो नमः । श्रीभद्रनृसिंहाय नमः ।
दिवाकरंपदद्वन्द्वै फलद्वन्द्वप्रदायकम् ।
त्रैलोक्यतमसो नाशकर्तृकं तं नमाम्यहम् ॥
प्रोजाप्तं निजमकरन्दमन्दराद्रिमन्थौ
निर्मथ्य प्रथिनततरान्धकारसिन्धुम् ।
लोकेभ्यो वितरति सत्प्रकाशरत्नं
तं वन्दे वनजवनीविनोदसिन्धुम् ॥
श्यामं मानं प्रणामो भृतभरनचलल्लोचनालिङ्गनेन
भ्राम्यद्भृङ्गाब्दभूरिभ्रमजनतपरो जानकीवल्लभाङ्गी ।
तातश्रीनीलकण्ठामलपरकृपया लब्धशास्त्रार्थतत्त्वः
कुर्वे श्रीशङ्करोऽहं सहृदयहृदयप्रीतये सद्वृतार्कम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

तत्र व्रतकालः । हेमाद्रौ गार्ग्यः -

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्रङ्गे च गुरौ शुक्रे बाले वह्ने मरिम्लुचे ।
उद्यापनमुतारम्भं व्रतानां नैव कारयेत् ॥

End :

नारी वा पुरुषो वापि व्रतस्यास्य प्रभावतः ।
राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे मार्गशीर्षकृष्णैकादश्यां वैतरणीव्रतोद्यापनं सम्पूर्णम् । इत्यैकादशीव्रतानि । श्रीकृष्णार्पणमस्तु ।

General matters common to all Vratas are given in the beginning and then individual Vratas are dealt with. There is a table of contents in the beginning where the name of the work is given as 'Vratārkanāma Vratarājaḥ'. The author Śankara is the son of Nilakaṇṭha.

480
ĀṀNĀYASTOTRA

Beginning :

शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्य देवताः ॥

End :

यस्त्रिसन्ध्यं पठेद्विद्वानाम्नायस्तोत्रमुत्तमम् ।
सर्वपापविमुक्तात्मा सर्वैश्वर्यसमन्वितः ।
भुक्त्वा भोगान् यथाकामं श्रीविद्यालोकमाप्नुयात् ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ।

490
KRIYĀKAIRAVACANDRIKĀ

Beginning :

हरिः ओम् । शुभमस्तु ।
अस्तु मेधाप्रदं नित्यं वस्तु कौस्तुभलक्षणम् ।
कारणं जगतामासीत् कमलं यस्य नाभिजम् ॥
भद्राण्युन्निद्रयन्तु प्रबलतरसुधासिन्धुकल्लोलमाला-
पारम्पर्यप्रचारप्रहसननिपुणप्राग्यकान्तिप्ररोहाः ।
निर्मर्यादं सदा नस्त्रिभुवनजनतानन्दसन्दोहदान-
प्रावीण्यप्रौढचारप्रकटितविभवाः पद्मवल्लीकटाक्षाः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

श्रीमत्कौशिकवंशाब्धिचन्द्रेण गुरुसेविना ।
तन्यते श्रीवराहेण क्रियाकैरवचन्द्रिका ॥
पाञ्चरात्राब्धिसञ्जातपाद्मतन्त्रसुधाकरात् ।
क्रियासुधां समुद्धृत्य करोमि विबुधप्रियाम् ॥
आदौ तावद्रूपरिक्षाविधिरुच्यते ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

End :

महाबाहो वैनतेय.... पयोधिप ।
सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये ॥
कर्मणां सिद्धिमाहूतः कुरुष्व विहगेश्वर ।
आहूतव्यास्त्रयो लोकास्त्वयि सन्निहिते विभो ॥
इति गरुडं....

Colophon :

इति श्रीवराहगुरुविरचितायां क्रियाकैरवचन्द्रिकायां सहस्रकलशस्नपनविधिर्नाम एकत्रिंशत् परिच्छेदः ।

(folio 123)

491
KRIYĀSĀRA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । गुरुभ्यो नमः । श्रीवेदव्यासाय नमः ।
गणेशानं नमस्कृत्य शिवं नारायणं प्रभुम् ।
क्रियासारं प्रवक्ष्यामि समासाद्य समासतः ॥
सर्वशास्त्रेषु निर्दिष्टं सर्वं सङ्गृह्य लक्षणम् ।
विशेषतस्तु यत्रैतत् प्रोक्तं वक्ष्ये यथातथम् ॥

End :

रात्रौ देवं च संपूज्य ध्वजं चाप्यवरोहयेत् ।
श्वोभूते स्नपनं कुर्याद्रात्रौ भूतबलिं हरेत् ॥
प्रायश्चित्तादिकं सर्वं वैष्णवोक्तं समाचरेत् ।
इति संक्षेपतः प्रोक्तो गोविन्दस्थापनं परम् ॥
कृत्वैवं पितृभिः सार्धं विष्णुलोकमाप्नुयात् ॥

Colophon :

इति क्रियासारे षट्षष्टिः पटलः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Date : 24th Mithunam 1047 M.E.

Scribe : Keśavan.

Digitized by Arya Samaj Foundation Chennai and eGangotri

The installation, routine rituals, festivals, renovation of the temple etc., relating to Śiva, Viṣṇu, Śaṅkaranārāyaṇa, Durgā, Skanda, Vināyaka, Śāstā and Kṛṣṇa are given in detail in separate sections.

The name of the author, Ravi, occurs at the end of Paṭala 62 –

रविणाज्ञतमेनायं क्रियासारः प्रभासते ।
उक्तस्तज्ञैः सदा शोध्यो गुणज्ञैः साधुकारिभिः ॥

535
PĀÑCARATRA

Beginning :

हरिः ओम् ।
प्रथमं ब्रह्मरात्रं तु द्वितीयं शिवरात्रकम् ।
तृतीयमिन्द्ररात्रं तु चतुर्थमृषिरात्रकम् ॥
तद्बृहस्पतिरात्रं तु पञ्चरात्रं प्रशस्यते ॥
रात्रभिः पञ्चभिः प्रोक्तं श्रुतं शिष्यैस्तु पञ्चभिः ।
तस्मात्तु पञ्चरात्राख्यं शास्त्रं विष्णुमुखोद्गतम् ॥

End :

नैमिकानि च सर्वाणि नवव्यूहैश्च नामभिः ।
द्रव्याणि कथितान्यासु नवजुह्वासु होमयेत् ॥
इति सम्यक् समाख्यातमग्निकार्यं द्विजोत्तम ।
कुर्वन्तः कारयेत् होमाद् भुक्तिमुक्ती प्रयान्ति ते ॥

इति पाञ्चरात्रे कपिञ्जलसंहितायामग्निकार्यविधानं नाम षोडशोऽध्यायः ।

545
PRATIṢṬHĀSAṄGRAHA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
ओम् । मन्त्रभेदेन सप्तधा दिव्यैः सब्रह्मवाचकैः बलादिमन्त्रयुक्ता तत्पदप्रदा । सिद्धार्थेन साङ्गेन मन्त्रेण बलादिमन्त्रैर्युक्ता भोगमोक्षदा । केवलं मूलमन्त्रेण ध्यानान्वितेन प्रतिष्ठा मन्त्रसिद्धिदा ।

End :

बहिर्गत्वा बलिं दत्वा । आचम्य । कुम्भस्थमुद्वास्य । ततो मण्डलस्थमुद्वास्य । कुण्डस्थमुद्वास्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

विष्वक्सेनं यजेत् प्राग्वदिष्टशिष्टैः क्रमेण तु ।
भूषयेत्पुरुषूर्वान्तु मूर्तिपान् कल्पनविधिः ॥
एवं बिम्बं प्रतिष्ठाप्य प्रासादे स्वे गृहे तु वा ।
ततः प्रभृति कालाच्च पूजयेत् प्रतिवासरम् ॥

Digitized by Vidya Samaj Foundation Chennai and eGangotri

Colophon :

प्रतिष्ठासङ्ग्रहः समाप्तः ।

551
PRĀYAŚCITTASAṄGRAHA

Beginning :

हरिः

श्रीभगवानुवाच-

प्रायो विनाश इत्युक्तश्चित्तं सन्धानमुच्यते ।
विनाशस्य तु सन्धानं प्रायश्चित्तमिति स्मृतम् ॥
अथातः संप्रवक्ष्यामि प्रायश्चित्तविधिं परम् ।
नित्ये नैमित्तिके चैव सर्वदोषनिकृन्तनम् ॥

End :

एवं विचार्यकर्तव्यं पञ्चरात्रविशारदैः ।
अन्यथा चेन्महादोषः कर्तुर्देशाधिपस्य तु ॥
तस्मात् सर्वप्रयत्नेन तूक्तमार्गेण कारयेत् ॥

इति पाञ्चरात्रे महोपनिषदि श्रीपक्षसंहितायां सूतकाशौचनिर्णयो नाम एकविंशोऽध्यायः ।

Colophon :

प्रायश्चित्तसङ्ग्रहः समाप्तः ।

The work is a compendium of sections on Prāyaścittas connected with the installation and workshop of idols in temples taken from various treatises on Pāñcarātra. The following are the main works drawn upon :

परमपुरुषसंहिता, विष्वक्सेनसंहिता, अगस्त्यसंहिता, वासिष्ठसंहिता, नारदीयसंहिता, विश्वामित्रसंहिता, प्रश्नसंहिता, सनकसंहिता, परमसंहिता, नारायणसंहिता, ब्रह्मसंहिता, जयाख्यसंहिता, पौष्करसंहिता, हिरण्यगर्भसंहिता, ईश्वरसंहिता, विज्जलसंहिता, गौतमसंहिता, काश्यपसंहिता, नारसिंहसंहिता, विष्णुसंहिता, विष्णुरहस्यम्, पाद्मतन्त्रम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning :

श्रीगणेशाय नमः ।

श्रीमन्नारायणं नत्वा पूर्णबोधान् तथा गुरून् ।
संक्षेपा(द् विष्णुपू)जायाः पद्धति लिख्यतेऽधुना ॥
कृतस्नानादिनित्यक्रियो वस्त्रशोधित....

End :

वेदव्यासेन मुनिना वेदव्यासप्रसादतः ।
पद्धतिर्विष्णुपूजायाः कृता संक्षेपतः शुभा ॥

Colophon :

इति वेदव्यासतीर्थैः कृता पद्धतिः समाप्ता ।

735
TĀRATAMYA

Beginning :

विष्णुः सर्वोत्तमोऽथ (प्रकृतिरथ विधिः प्राणनाथावधेक्ते
ब्रह्मा)णी भारती च द्विजफणिपमृडाश्च स्त्रियः षट् च विष्णोः ।
सौपर्णी वारुणी पर्वतपतितनया चेन्द्रकामावथास्मान्
प्राणोऽव्यो योऽनिरुद्धो रतिमनुगुरवो दक्षशच्यौ च पान्तु ॥

End :

एभ्योऽन्ये चाग्निजाया च जलमयबुधश्चापि नामात्मकोषा-
श्चैवं भौमस्तथात्मा शनिरपि कथितः पुष्करः कर्मकोऽपि ।
एतेऽथो चाप्युतान्ये अपि कथितसुरामध्यभागे सुतास्ते
विष्ण्वाद्या नः पुनन्तु क्रमकथितमहातारतम्येन युक्ताः ॥

Colophon :

इति तार(तम्यम्) ।

810
RĀMARAKṢĀSTOTRA

Beginning :

अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य । बुधकौशिकऋषिः । श्रीसीतारामचन्द्रो देवता । अनुष्टुप्छन्दः । सीता शक्तिः श्रीमद्धनूमान् कीलकम् । श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः । अथ ध्यानम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डनं रामचन्द्रम् ॥

Digitized by Vrindavan Research Institute and Sadhanapitha

End :

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम! मामुद्धर ॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामतस्तुल्यं रामनाम वरानने ॥

Colophon :

इति बुधकौशिकविरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णम् ।

816
RĀMĀṢṬAPRĀSA

Beginning :

श्रीगणेश्वराय नमः । श्रीरामाय नमः ।

त्रातारं कम.... कस्य भुवने भूतानुकम्पेति च
ध्यातासु त्रिदशावलीषु न भवेत्येतादृशे कोऽपि यत् ।
वातापत्यनिवेशितप्रणयिनीदूताधिकारं ततः
सीताविभ्रमदेशिकं मृगयते जातादरं मे मनः ॥

End :

वासे त्वातिजिगुल्फिसेतुनगरेष्वासे तु वाराणसी-
ग्रासे बन्धरुचेर्नखैव कृतवानासेवनं ते विभोः ।
त्रासे सत्यधुनातिघोरनरकादासेदुषस्त्वं मम
व्यासे यस्य च किं क्षमो रघुपते! दासेषु कर्तुं कृपाम् ॥
नीलाम्भोदनिभं युगान्त....

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

LAGHUVĀYUSTUTI

Beginning :

श्रीरामचन्द्राय नमः । ओम् ।
वासुदेवं सदानन्दतीर्थानन्दसन्दोहसन्दानशीलम् ।
स्वामिनं सच्चिदानन्दरूपं नन्दयामो वयं नन्दतीर्थम् ॥
श्रीहनूमन्तमेकान्तभाजं राघवश्रीपदाम्भोजभृङ्गम् ।
मारुतिं प्राणिनां प्राणभूतं नन्दयामो वयं नन्दतीर्थम् ॥

End :

मायिगोमायुमायान्धकारध्वंसमार्तण्डमूर्तायमानम् ।
सज्जनानन्दसन्दोहधेनुं नन्दयामो वयं नन्दतीर्थम् ॥
इन्दिरापाङ्गमानान्दमूर्तिं सुन्दरीमिन्दिरामिन्दुकान्तम् ।
दासमेकं सदा तत्त्वदीपं नन्दयामो वयं नन्दतीर्थम् ॥

Colophon :

इति श्रीत्रिविक्रमपण्डिताचार्यविरचिता लघुवायुस्तुतिः समाप्ता ।

The work has another title 'Aṇuvāyustuti' and the same is given in some manuscripts.

855

VĀYUSTUTIVYĀKHYĀ – SUVARṆAMAÑJARĪ

Beginning :

परन्त्वस्मान् पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटा-
कुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कण्ठीरवस्य प्रततसुनरवरा दारितारातिदूर-
प्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता नाकिवृन्दैः ॥

श्रीमध्वगुरुभ्यो नमः । हरिः ओम् ।

नत्वा विष्णुं परं प्राणं त्रिविक्रम महाबुधान् ।
वायुदेवस्तवव्याख्यां यथाशक्ति करोम्यहम् ॥
अनेकभावगम्भीरतया दुरवगाहता ।
यद्यप्यस्य प्रतीताथलेशव्याख्यैव तन्यते ॥

तत्रायं प्रथमश्लोकः - श्रीमद्विष्णवङ्घ्रीति । श्रीमद्विष्णवङ्घ्रिनिष्ठातिगुणगुरुतम श्रीमदानन्दतीर्थत्रैलोक्याचार्यपादोज्ज्वलजलजलसत्पांसवः अस्मान् पुनन्तु इत्यन्वयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

सुबहुप्रयाख्यपूरे: सुत इति सुभृशं केशवानन्दतीर्थ-
Digitized by Arya Samaj Foundation Chennai and eGangotri
श्रीमत्पादाब्जभक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य ।
तत्पादार्चादरेण ग्रथितपदलसन्मालया त्वेतया ये
संशध्यामुं लभन्ते प्रततमतिगुणान् मुक्तिमेते व्रजन्ति ।।
वायुदेवस्तवनाख्यारूपिणी रोचयन्त्यलम् ।
सुवर्णमञ्जारीयं तु रामेणाकारि शोभना ।।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यचरणनलिनसेवकोपजीवी... कविकुलतिलक श्रीत्रिविक्रमपण्डिताचार्यविरचितश्रीवायुस्तुतिव्याख्या कान्तारामविराचिता परिसमाप्ता ।

856
VĀYUSTUTIṬĪKĀ

Beginning :

श्रीमध्वगुरुभ्यो नमः । अविघ्नमस्तु ।

त्यागी चाशेषदोषाणां भागी बहुगुणोन्नतेः ।
रागी विश्वस्य... शाटीकुर्यात्तु सानतिः ।।
निघ्ना नानास्तु विघ्नौघभग्नभक्ताघघो हरिः
निघ्नो निरस्तदोषाणां भग्नभूतेशकार्मुकः ।।
यो वै वैकुण्ठभर्तुः सकलसुरशिरःश्रेणिसंलालिताङ्घ्रिं
धृत्वा भूमिं च गत्वा श्रुतिनिकरपुराणादिभिर्वादिवृन्दम् ।
जित्वा भाष्यं च कृत्वा प्रकरणनिकरं स्थापयामास तत्त्वं
मध्वाचार्याय तस्मै नतशिरसि ततस्त्वेष बद्धोऽञ्जलिर्मे ।।
व्याख्यानछद्मना मुख्यप्राणसद्गुणचिन्तनम् ।
करोम्यालोक्य पूर्वेषां व्याख्यानं बुद्धिशुद्धये ।।
बिन्दुवृन्दैरहं मन्दः सन्दोहं स्रावयाम्यहो ।
प्राचां विपश्चितां वायुस्तुतिव्याख्यां कृता...।।
अस्या वायुस्तुतेर्गूढभावार्थाय यथामति ।
वेदात्मयतिना व्याख्या क्रियतेऽन्वयवर्तिना ।।

इह हि आपूर्वापरदक्षिणोत्तराशाध्वनीननिरर्गलकीर्तिस्तत्त्वप्रदीपिकाकर्ता सकलकविकुलशिरोमणिः सकलाचार्यवर्यो भगवांस्त्रिविक्रमाचार्यः प्रधानवायोरवतारत्रयतत्प्रयोजनज्ञानदानेन सञ्जीवानुज्जीवयितुं वायुस्तुतिं चिकीर्षुः चिकीर्षिताविघ्नपरिसमाप्त्यादिप्रयोजनसाधकं 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याशीराद्यनतमस्य प्रबन्धमुखलक्षणत्वात् प्रबन्धमुखे शिष्यशिक्षार्थं

CC-0. Prof. Satya Vrat Shastri Collection.

आशीर्वादरूपं मङ्गलमादावङ्गीकरोति - श्रीमद्विष्णवङ्घ्रीति । श्रीरस्यास्तीति श्रीमान् । 'तदस्यास्त्यस्मिन्' इति मतुप् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

End :

'आयोधने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्' इत्यमरः । निष्पिष्टं नितरां चूर्णीकृतम् । दुष्टाः राक्षसाः तेषामधिपो रावणः, तस्य उरः वक्षःस्थलं लोको जनः दृष्ट्वा, हाटकाद्रिसुवर्णगिरिः मेरुः तस्य प्रकटः प्रकाशमानः तटो रोधः तटाक इति । अति अत्यर्थं शङ्का....

875
VIṢṆUSTUTI
(With Commentary)

Beginning :

श्रीमध्वपतये नमः ।

विष्णोरस्मान् पदाब्जे कृतनिवसतयः पांसवः पावयन्तु
श्रीमन्तः श्रीकबर्यां कुसुमसुनिचये पूरयन्तः परागान् ।
लालाट्यां लेखिकायामजनि पवनयोरक्षतां निक्षिपन्तः
पौनःपुन्येन शुद्धिं हरशिरसि नते जाह्नवीं जोषयन्तः ॥

सज्ज्ञानपरिपूर्णसदानन्दसान्द्रभक्तभक्त्यतिशयेन लोके परात्परतरं विष्णुं अनुवर्णयति - विष्णोरिति । विष्णोः परमात्मनः पादावेव अब्जे पादकमले कृता निवसतिर्यैस्ते कृतनिवसतयः । श्रयन्ते यां सर्वे जनाः इति श्रीः । श्रीर्विद्यते एषामिति श्रीमन्तः । कुसुमानां पुष्पाणां सुनिचये सम्यक्समुदाये परागान् पुष्परजांसि पूरयन्तः वर्धयन्तः ।

End :

अज्ञानादिलेशस्पर्शहीना । निरन्तरमनन्तपार्श्व एव विलसन्ती पश्यन्ती वर्तत इति । यतः अतोऽपि हितस्यासङ्गतत्वमेव । न चैतादृशं प्रमाणमुपलभामहे । ये च युष्मदुक्तिसम्भव इति स्यादेतत् । तस्या देव्या उक्तगुणसाकल्ये सत्यप्यस्य भगवतोऽनन्तगुणत्वेन अपरिच्छेद्यत्वादेवोक्तम् ।....

876
VIṢṆUSTUTIVYĀKHYĀ – AMṚTAPADDHATI

Beginning :

'....मिन्दिराया अनन्तवीर्यामृतविक्रमस्य' इत्यादिवचनं चात्र प्रमाणमिति । वेत्तेति । क इव ब्रह्मोपस्थितोऽपि । कवीन्द्रः कविप्रधानः एव एषामिति प्रस्तुतानां गुणानामिति भावः । एषां मध्ये एकैकं विविधगुणा....

CC-0. Prof. Satya Vrat Shastri Collection.

End :

स्वामी रमेशः श्रीपतिः विशदां दृष्टिं स्वच्छां विद्यां क्रमेण अमलां अपरोक्षदृष्टिं इष्टां मुक्तिं च प्रदिशति ददातीति ।। श्रीः ।।

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं विष्णुस्तुतिव्याख्या स्वरूपामृतपद्धतिः ।
विमलाकारि कान्तारामेण रुचिराकृतिः ।।

Colophon :

विष्णुस्तुतिव्याख्या कान्तारामविरचिता अमृतपद्धतिः समाप्ता ।

918
ŚIVASTUTI

Beginning :

हरिः । श्रीसरस्वत्यै नमः ।
स्फुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ! ते वपुरवेक्षिषेऽपि क्षणम् ।।

End :

श्रितां श्रवणपद्धतिं सरलसन्नुतोक्तेत्यसौ
शिवस्य करुणाकरीं विदधतात् स्वदासोदिताम् ।
इति प्रथितमानसो व्यधित नाम नारायणः
शिवस्तुतिमिमां शिवां तिलकसूरिसूनुः सुधीः ।।

Colophon :

इति श्रीमत्कविकुलतिलकश्रीत्रिविक्रमपण्डिताचार्यसूनुनारायणपण्डिताचार्यविरचिता शिवस्तुतिः समाप्ता ।

956
TATTVOPADEŚA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
वेदान्ते सच्चिदानन्दस्वरूपमिति कीर्तितम् ।
व्याप्तमाकाशवत् सूक्ष्मं प्रत्यग्ज्योतिःप्रकाशकम् ।।
मायाशबलितं ब्रह्म परमात्मेति कीर्त्यते ।
गुणत्रयात्मिका माया गुणाः सत्त्वं रजस्तमः ।।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियाण्यपि नात्मानः करणत्वात् प्रदीपवत् ।
प्राणोऽप्यात्मा न भवति ज्ञानाभावात् सुषुप्तिषु ॥
देहेन्द्रियमनोबुद्धि....

Colophon :

इति तत्त्वोपदेशे द्वितीयोऽध्यायः । (folio 10 a)

974
NAIṢADHĪYACARITAVYĀKHYĀ – PADAVĀKYĀRTHAPAÑCIKĀ

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
नमस्यामि निशानाथकलाकलितशेखरम् ।
जटावल्लीसमुल्लासिप्रसूनमिव शङ्करम् ॥
नानाश्रुतिशिरोदुर्गवनवीथिविहारिणम् ।
दुर्दान्तदन्तिदमनं हरकेसरिणं नुमः ॥
तस्मै नुमस्त्रिलोकैकरत्नद्वीपाय शम्भवे ।
अनन्याक्षेपमस्तोकं नित्यं जयति यन्महः ॥
श्रीहर्षस्य कवेः काव्यं वर्णैश्चित्रं रसान्वितैः ।
व्याख्यातूलिकयास्माभिर्व्यक्तमुन्मीलयिष्यते ॥

महाकाव्यमारभमाणः कविराशीरादिष्वन्यतमेन भवितव्यमिति कथानायक (रूपं) वस्तु निर्दिशति, यदाहुः 'अशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति, - निपीयेत्यादि ।

End :

श्रीहर्षस्य कवेरनन्यसुलभं वैद्यत्वमुद्योतयन्
सूक्तिष्वद्भुतवस्तुयोगमहिमा जागर्ति लोकोत्तरः ।
यं हि श्रोत्रपुटैर्गलःकृतधियां संसेव्य सांसारिकं
चेतो रागमपास्य विन्दति परामामोदमेदान्विताम् ॥
अष्टमः सर्गः ।

Colophon :

इत्याचार्यविश्वेश्वरसूनुविरचितायां नैषधचरितदीपिकायां पदवाक्यार्थपञ्चिकायां प्रथमः सर्गः समाप्तः । (folio 22 b)

The Ms. contains the commentary upto Canto 8, but Canto 6 is missing. The name of the author is given here as Viśveśvarasūnu, but in some the Mss. of other libraries it is seen to be Viśveśvarasūri.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Vyas Sanskrit Foundation, Vrindavan Dham Sangotri

Beginning :

श्रीगुरुभ्यो नमः ।

निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितछत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥

यस्य क्षितिरक्षिणः कथाः निपीय बुधाः सुधामपि नाद्रियन्ते सितछत्रितकीर्तिमण्डलः महसां राशिः महोज्ज्वलः नलः सः आसीत् । यस्य क्षितिरक्षिणः कथाः चरित्राणि निपीय नितरां पीत्वा बुधाः नलचरित्रज्ञाः विद्वांसः सुधामपि अमृतमपि तथा तेन प्रकारेण नाद्रियन्ते न रोचन्ते । सितछत्रितकीर्तिमण्डलः श्वेतच्छत्रीकृतयशःसमूहः । महसां तेजसां राशिः समूहः । महोज्ज्वलः महैः उत्सवैः उज्ज्वलः दीप्यमानः । नलः नलसंज्ञो राजा । सः आसीत् अस्ति स्म ।

End :

समदृश्यत । कः रसालसालः । केन अमुना । दित्सन्निव स्थितः । किं तजनाभयम् । कस्मै जनाय । कीदृशाय वियोगिने । कैः मुकुलैः । कीदृशैः समीरलोलैः । पुनः कीदृशः स्फुरद्विरेफारवरोषहुंकृतिः ॥

983, 984
SISUPĀLAVADHAVYĀKHYĀ – BĀLABODHIKĀ

Beginning :

हरिः ।

इत्थं सैनिकसामान्यसाम्परायविधानं वर्णयित्वा विशिष्टयोधायोधनमुपवर्णयति –

अथोत्तस्थे रणाटव्यामसुहृद्वेणुदारिणा ।
नृपाङ्घ्रिपौघसङ्घर्षादग्निवद्वेणुदारिणा ॥

इति । अथ वेणुदारिणा रणाटव्यामुत्तस्थे इत्यन्वयः ।

End :

परमृगव्याधः शत्रुहरिणा(नां) लुब्धकः, अत्यन्तोच्छेदकर इत्यर्थः । उदयी जयलक्ष्मीसंयुक्तः । 'स्तृञ् छादने' इति धातुः । 'ऋच्छत्यृताम्' इति किति गुणः । अयं कविकाव्यनामगर्भश्चक्रश्लोकः ।

Colophon :

इति जयसिंहाचार्यकृते माघव्याख्याने बालबोधिकाख्ये एकोनविंशः सर्गः ।

983 and 984 are portions of two entirely different manuscripts. But one is a continuation of the other and together they constitute the commentary on Canto 19 which illustrates various Citrabandhas.

CC-0. Prof. Satya Vrat Shastri Collection.

986

Digitized by Arya Samaj Foundation Chennai and eGangotri

SISUPALAVADHAVYAKHYA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
यस्य लक्ष्मीभुजाश्लेषकण्ठे कङ्कणराजयः ।
मणिमाला इवाभान्ति स वः पातु जनार्दनः ॥
श्रीदेवराजविदुषा शिशुपालवधाभिधे ।
काव्ये करिष्यते टीका नातिसंक्षेपविस्तरा ॥
आलोक्य माघकाव्यस्य व्याख्यानानि बहून्ययम् ।
तत्तद्व्याख्यागतानर्थान् लिख्यते तत्र केवलम् ॥
हरिदासात्तु तात्पर्यं वल्लभात् पदनिर्णयम् ।
ज्ञात्वा श्रीरङ्गदेवात् यत्सारं तच्च विलिख्यते ॥

End :

मनीषा विद्यते येषां प्रशंसायाम् । 'व्रीह्यादिभ्यश्च' इतीनिः ॥
न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताविव ।

989

ŚRĪRĀMACARITA

Beginning :

हरिः । श्रीगुरुभ्यो नमः । अविघ्नमस्तु ।
श्रीपतिं गीर्गुरुं सूर्यं प्रवन्द्य पितरौ सदा ।
संक्षेपेण विधास्यामि श्रीरामचरितं महत् ॥
वाल्मीकीये पुरा प्रोक्तं नारदेन महर्षिणा ।
तस्मिन् विलोक्य संक्षेपात् कीर्तये मन्दबुद्धिना ॥
पूर्वापरं वायपरं च पूर्वं बाल्यात् कृतं रामचरित्रमेतत् ।
क्षाम्यन्तु सर्वे हरिभक्तवर्याः कुर्वन्तु ते वै मम सुप्रसादम् ॥

तत्रादौ इष्टदेवतानमस्कारः -

श्रीमत्यां द्वारवत्यां नवकनकमये मण्डपे दीप्यमाने
मध्ये सिंहासनस्थं सुरतरुनिकटे गोपगोभिः सतीभिः ।
दोर्भिः शङ्खारिवेणुं धृतमणिमकुटं हारकेयूरभूषं
बाह्यारण्ये वसन्तं यदुकुलतिलकं वेणुगोपालमीडे ॥

End :

अतस्त्वमेत्य वैकुण्ठं पाहि लोकान् मुनीन् सुरान् ।
इति ब्रह्मादयः स्तुत्वा स्वं स्वं स्थानं प्रपेदिरे ॥

CC-0. Prof. Satya Vrat Shastri Collection.

ततः स रामो भगवान् कृत्वा भूमिमकण्टकाम् ।
मुनीनां भूसुराणां च भक्तानां परिपालकः ॥
Digitized by Arya Samaj Foundation Chennai and eGangotri
वैकुण्ठमासाद्य रघूत्तमस्तदा संयोज्य चात्मानमनन्तमात्मनि ।
दत्वा स्वभक्तान् निजपादसेवकानप्राप्तकैवल्यपदं सुरेश्वरः ॥
इदं च रामचरितं ये पठन्ति द्विजोत्तमाः ।
इह लोके तु सौभाग्यं तेषां मोक्षं परत्रके ॥

Colophon :

इति श्रीमद्रघुवरचरिते युद्धकाण्डः समाप्तः ।

रामकृष्णसुतजनार्दनभट्टसुतगोपालेन कृतं श्रीरामचरितम् ।

The work is known as Raghuvaracarita also. The author Gopāla is the son of Janārdanabhaṭṭa and grandson of Rāmakṛṣṇa. He refers to Vibudhendratirtha at the end of the Sundarakāṇḍa in the verse –

श्रीरामदासचरणाम्बुजसेवितानां
वेदान्तशास्त्रपरिनिष्ठितव्याससेव्यान् ।
सूरीन्द्रतीर्थकरपङ्कजसम्भवेशान्
नित्यं नमामि विबुधेन्द्रयतीन्द्रपादान् ॥

990
HANUMADVIJAYA

Beginning :

(हरिः श्रीगणपतये नमः ।) अविघ्नमस्तु ।
ससौमित्रिं रामं जनकसुत....
....प्रमथन....पटुतरम् ।
गिरिप्रख्यं सङ्घे....मैरावणगण-
....जलधितरणे जाङ्घिकमहम् ॥

प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते ।
दर्शनाय समाजग्मुरयोध्यायां मुनीश्वराः ॥
अगस्त्यो भगवानत्री विश्वामित्रः शुचिश्रवाः ।
गौतमः काश्यपः कण्वस्त्रिमूर्धाश्शतपुष्करः ॥
शक्तिः पराशरो व्यासः शतानन्दः सुनन्दनः ।
वसिष्ठो वामदेवश्च जाबालिर्गौतमो भृगुः ॥
बौधायनो मुनिश्रेष्ठः पुलस्त्योऽगस्त्य एव च ।
आपस्तम्बः शतस्तम्भो वत्सः कुत्सस्तपोधनः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एते चान्ये च बहवो ब्रह्मिष्ठा वेदपारगाः ।
सशिष्याः सप्रशिष्याश्च ससुतज्ञातिबान्धवाः ॥
अन्वर्थनाम्नीं नगरीं प्राप्यायोध्यां जनाकुलाम् ।
सभायां रत्नपर्यङ्के भ्राजमानमनामयम् ॥
जितारिं भ्रातृभिश्चैव सेव्यमानं नृपैरपि ।
मैथिल्या क्लेशशैथिल्यकल्पपुण्यचरित्रया ॥
भ्राजमानं वामभागे रोहिण्येव सुधानिधिः ।
सुग्रीवाद्यैरपि तथा वानरैः श्रुतविक्रमैः ॥
निशाचरैश्च संसेव्यं विभीषणमुखैः पुरः ।
ददृशुर्देवसङ्काशं रावणारिं रघूद्वहम् ॥

End :

हनुमद्विजयं यश्च शृणोति प्रतिवासरम् ।
स नित्यं पूजितो देवैर्विष्णुलोके महीयते ॥
एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्पष्टं बलं विष्णोः प्रवर्धताम् ॥

Colophon :

इति श्रीमद्धनुमद्विजये मैरावणवधे एकषष्टितमः सर्गः । शुभमस्तु ।

Date :

हनुमद्विजयं पुण्यं क्षयाब्देऽधिकश्रावणे ।
अपरद्वादशीसोमवासरे लिखितं शुभम् ॥

994
GĪTAGOVINDAVYĀKHYĀ – BĀLABODHINĪ

Beginning :

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरहं त्वमेव तदिमं राधे! गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥
श्रीचैतन्यकृपाशीधुकणोन्मत्तेन केनचित् ।
टीका सङ्गृह्यते गीतगोविन्दस्य समासतः ॥
स्वयं बोद्धुमभिप्रायं जयदेवमहासतेः ।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥

CC-0. Prof. Satya Vrat Shastri Collection.

तत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः ।
Digitized by Arya Samaj Foundation Chennai and eGangotri
विवृतिर्न कृता सा तु ज्ञेया ग्रन्थान्तरैर्बुधैः ॥
बोद्धव्यो बालबोधिन्यां शब्दार्थः शब्दवेदिभिः ।
भावार्थदीपिकायां च भावो भावार्थलोलुपैः ॥

अथ श्रीराधामाधवयोर्विजनकेलिवर्णनमयं श्रीगीतगोविन्दाख्यं प्रबन्धमाचिन्वानः तत्र च तयोः सर्वोत्तमतां निश्चिन्वानः श्रीमान् जयदेवनामा कविराजः तमालवनतमःकुञ्जकुञ्जसदनाद्बहिः स्थितयोस्तयोस्तत्र प्रवेशाय गदितं श्रीराधिकासखीवचनमनुस्मरन् तदेव मङ्गलमाचरति तद्वर्णनमयत्वात् प्रबन्धोऽयं मङ्गलरूप इति विज्ञापयति - मेघैरिति ।

End :

सर्वसारत्वं दुरूहत्वं च बोधितम् । तत्र चायं क्रमः । आदौ श्रीकृष्णश्रेष्ठताप्रतिपादनं 'प्रलयपयोधिजले' इत्यादि 'वसन्ते वासन्ती'त्यन्तेन । ततः साधारणलीला तस्या उत्कण्ठावर्णनं च, ततः श्रीकृष्णस्याप्युत्कण्ठा 'यमुना तीरे' इत्यन्तेन । ततस्तस्याः श्रीकृष्णोत्कण्ठावर्णनं 'पूर्वं यत्रे'त्यन्तेन । ततोऽस्या अभिसारिकावस्थावर्णनम् 'अथ ता'मित्यन्तेन । ततो वासकसज्जा 'अत्रान्तरे' इत्यन्तेन । ततश्चन्द्रोदयात् पुनरुत्कण्ठा 'अथागता'मित्यन्तेन । ततो विप्रलब्धा 'अथ कथमपी'त्यन्तेन । ततः खण्डिता 'तामथे'त्यन्तेन । ततः कलहान्तरिता 'अत्रान्तरे मसृणरोषे'त्यन्तेन । ततो मानिनीवर्णनं 'सुचिरे'त्यन्तेन । ततो मेघावृते चन्द्रे सखीप्रार्थना 'सा समाध्वसे'त्यन्तेन । ततो विप्रलब्धा 'अन्योन्यावलोकनं गतवती'त्यन्तेन । ततः श्रीकृष्णप्रार्थना 'प्रत्यूहे'त्यन्तेन । ततो रहःकेलय 'इति मनसे'त्यन्तेन । ततः सहो यः समृद्धिमदाख्यसम्भोगरसानन्दितः श्रीपीताम्बरो यत्र स इति ।

यद्वत्स्वबालमुग्धोक्तौ पित्रा प्रीतिरवाप्यते ।
तद्वच्छ्रीकृष्णचैतन्यः प्रियतामत्र जागते ॥
गोविन्दपादसेवायाः प्रभावादुदिता स्वयम् ।
चैतन्यदासतो बालबोधिनी स्यात् सतां मुदे ॥

Colophon :

इति श्रीगीतगोविन्दटीकायां द्वादशः सर्गः । समाप्तोऽयं ग्रन्थः ।

995
GĪTAGOVINDAVYĀKHYĀ – PADADYOTANIKĀ

Beginning :

....लं वसनं वस्त्रं यस्य पीताम्बरेणेत्यर्थः । तेन वनमालिना या रमिता .... जनहसनेन लोकहास्येन वा न श्वसिति ....ति सम्भोगे । वियोगे तु परिजनहसनेन सपत्नीहसनेन श्वसिति ।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्नित्यैर्वचनैर्विरिञ्चिगिरिजाप्राणेशमुख्यैर्मुहु-
नानाकार्यविचारसारचतुरैर्नाद्यापि निश्चीयते ।
तद्भव्यैर्जयदेवकाव्यघटितैः सत्सूक्तिसंशोधितै-
राद्यं वस्तु चकास्तु चेतसि परं सारस्य सीमाजुषाम् ॥

यद्गान्धर्वेति । यत् जयदेवपण्डितकवेः गान्धर्वकलासु गानविद्यासु कौशलं पटुत्वं प्रावीण्य-मित्यर्थः । अस्तीत्यध्याहारः ।

पीताम्बरः कृष्णो यत्रेति ।
लक्ष्मी....जेयं भीष्मदासेन धीमता ।
कारिता गीतगोविन्दटीकेयं सुखदास्तु वः ॥
....दासनियुक्तेन ....पद्मसेविना ।
नारायणेन सुकृतं गीतगोविन्ददर्पणम् ॥

1001
BHĀRATASAṄKṢEPA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

जाताः कान्तारदेशे करिनगरमिताश्छद्मसद्मन्युषित्वा
दग्ध्वा तद्गेहमस्माद्विपिनमुपगतास्संहरन्तो हिडिम्बम् ।
वेदव्यासस्य वाचा वनभुवि वसतिं शालिहोत्रे च कृत्वा
गत्वातस्त्वेकचक्रं द्विजवरभवने तेऽवसन् पाण्डुपुत्राः ॥

End :

दुर्वादैः पाण्डवानां पुनरपि समरं प्राप्य भीमादवाप्ते
पञ्चत्वं धार्तराष्ट्रे सुविहितमृतकार्योऽथ धर्मात्मजन्मा ।
ज्ञात्वा ज्ञेयं समस्तं शरशयनगताद्भीष्मतः प्राप्य गेहं
सार्धं कृष्णानुजैः स्वां विधिवदनुदिनं पालयामास गोत्राम् ॥
इत्थं संक्षिप्य सर्वं रचितमघहरं पाण्डवानां चरित्रं
चित्रं नित्यं प्रभाते पठति च शृणुयाद्यो नरश्चिन्तयेद्वा ।
निश्शेषाभीष्टसिद्धिं सपदि स गतवान् मोदवानत्युदारां
भक्तिं चाप्नोति कृष्णे कृतवति समरे पार्थसारथ्यकेलिम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Arya Samaj Foundation Chennai and eGangotri

BHAṢĀKUSUMAMAÑJARĪ

Beginning :

श्रीगणपतये नमः । अथ भाषामञ्जरी लिख्यते ।
भ्रातः, भवन्तमभिवादयामि ।
सखे, आयुष्मान् भव । कस्माद्देशादागतो भवान् ?
आर्य, इदानीं दक्षिणदेशादागतोऽहमस्मि ।
सखे, भवता के के देशा दृष्टाः ?
पाञ्चालावन्तीकोसलप्रमुखा देशा अवलोकिताः ।
पुनः को देश अवलोकितः ?
पश्चात् कलिङ्गदेशोऽवलोकितः ।
पुनः को देशः प्रोक्षितः ?
पाण्ड्यदेशश्च दृष्टः ।
पाण्ड्यदेशे कवयः सन्ति किम् ?
बहवः सन्ति ।

End :

गुरुशुश्रूषां कुरु । सम्यग्विद्यागुरुं भजस्व । अभ्यस्तां विद्यां द्विगुणीकुरु । अभ्यस्तानि शास्त्राणि पठ्यताम् । निश्चितं शास्त्रं शिष्येभ्यः सन्मार्गे प्रवर्तय । परं श्रेयो लभस्व । बन्धून् धनधान्यादिभिः परिपालय । कीर्तिं सम्पादय । अहं च पुनरागमिष्यामि ।

Colophon :

इत्येवं समाप्तेयं भाषाकुसुममञ्जरी ।

This is in the form of a conversation between two friends, one narrating his travels and routine works to the other.

1014
MAHĀNĀṬAKASŪKTISUDHĀNIDHI

Beginning :

श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः । अविघ्नमस्तु । शुभमस्तु ।

विघ्नेशो वः स पायाद्विहतिषु जलधीन् पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवैः ।
क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूः क्वप्यनन्तः क्व च श्रीः
क्वाप्यौर्वः क्वापि शैलाः क्वचन मणिगणाः क्वापि नक्रादिसत्त्वाः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

शैलश्चापति यानति क्षितिरहिस्वामी गुणत्या (दरात्)
Digitized by Arya Samaj Foundation Chennai and eGangotri
युग्यन्त्यब्जभवोऽपि सूतति हरिर्नाराचति स्वेच्छया ।
किं चेन्दुश्च रवी रथाङ्गयुगलत्याश्चर्ययुक्तैः सुरै-
र्दत्ताशीर्वचनो जयेति कलयेच्छ्रेयः पुरामन्तकः ॥

निद्राणे वित्तनाथे सवितरि तरले जातशङ्के शशाङ्के
गोविन्दे मन्दगर्वे द्रवति मघवति क्लान्तकान्तौ कृतान्ते ।
अब्रह्मण्यं ब्रुवाणे वियति शतधृतावुद्धृतैकाग्रहस्तं
पायाद्वः कालकूटं झटिति कबलयन् हेलया नीलकण्ठः ॥

भो भो दिक्पतयः प्रयान्तु परतः समर्चताम्भोमुचः
पातालं व्रज मेदिनि प्रविशत क्षोणीतलं पर्वताः ।
ब्रह्मन्नुन्नय दूरमात्मभवनं नाथस्य नो नृत्यतः
शम्भोः सङ्कटमेतदित्यवतु नः प्रोत्सारणं नन्दिनः ॥

End :

मूलं फणाः फणिपतेर्गगनं च ....
शाखा दिशो जलधिमण्डलमालवालम् ।
श्रीरामचन्द्र! तव कीर्तिसुरद्रुमस्य
तारागणाः सुमनसः फलमिन्दुबिम्बम् ।
श्रीमानिम्मिडिदेवरायनृपतिः स्वर्लोककल्लोलिनी-
कल्लोलप्रतिमल्लसूक्तिविभवो विद्वज्जनश्लाघितः ।
श्रीमान् षष्ठवरेण्यकाण्डविषयाव्यस्तान्महानाटक-
श्लोकान् वर्णपदक्रमोज्ज्वलतरान् नव्यानकार्षीत् प्रभुः ॥

Colophon :

इति षष्ठो युद्धकाण्डः समाप्तः ।

This is an anthology of verses based on the Mahānāṭaka arranged Kāṇda-wise. In the margin of the folios the title is given as "Mahānāṭakarāmāyaṇa'. The better known title is given above. The author is identified with Immadidevarāya–V of Vijayanagar.

1026
AGNINĀMĀNI

Beginning :

हिरण्यकनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरक्ता बहुरूपा जिह्वा सप्त प्रकीर्तिताः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

हिरण्यवारुणी जिह्वा कनका मध्यमास्थिता ।
उत्तरे दिशि रक्ता च कृष्णा याम्यां दिशि स्थिता ।।
सुप्रभा पूर्वदिक्स्था स्यादतिरक्ताग्निकास्थिता ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

End :

वह्निनामा लक्षहोमे कोटिहोमे हुताशनः ।
समुद्रे बडवो ह्यग्निः क्षये संवर्तकस्तथा ।।
ब्रह्मा वै गार्हपत्ये च ईश्वरो दक्षिणस्तथा ।
विष्णुरावहनीयस्य अग्निहोत्रतयाग्नयः ।।

End :

इति अग्निनामानि ।

1044
EKĀKṢARAKOŚA

Beginning :

हरिः श्रीगणपतये नमः ।
आगमेभ्यो विधानेभ्यो धातुभ्यः शब्दशासनात् ।
एतदेकाक्षरं नामाभिधानं क्रियते मया ।।
कः प्रजापतिरुद्दिष्टः को वायुरिति विश्रुतः ।
कश्चात्मनि समाख्यातः कः प्रकाश उदाहृतः ।।

End :

ओकारो भैरवो देव औकारोऽनन्त उच्यते ।
अमिति स्यात्परं ब्रह्म अः स्याच्चापि महेश्वरे ।।

Colophon :

इति श्रीक्षपणकरत्नविरचितः एकाक्षरकोशः समाप्तः ।

1051
NIGHAṆṬU

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
प्रणम्य मूर्ध्ना सर्वज्ञं निघण्टुरभिधीयते ।
चन्द्रनन्दनसंज्ञेन रविनन्दनसूनुना ।।
अष्टाङ्गहृदयोक्तेषु गणेषु मदनादिषु ।।
द्रव्येषु विप्रकीर्णेषु तथा संज्ञान्तरेषु च ।।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोरोचना पिङ्गला च मङ्गल्या रुचिरा रुचिः । Gorocanam
सिन्धूरो रक्तरेणुश्च रजो रक्तं च नागरम् । Sindhūrappoṭi
शृङ्गारभूषणं श्रीमान् वसन्तोत्सवभूषणम् ॥

Colophon :

इति श्रीमदनादिनिघण्टुः समाप्तः ।

Malayāḷam terms are sometimes given.

1065
MADHVAGRANTHASŪCĪ

Beginning :

श्रीगुरुभ्यो नमः ।
कृष्णं विद्यपतिं नत्वा पूर्णबोधं च सद्गुरुम् ।
ग्रन्थान् मध्वकृतान् वक्ष्ये सप्तत्रिंशदहं सुधीः ॥
गीताभाष्यं चकारासौ प्रथमं तुष्टिदं हरेः ।
भाष्यानुभाष्ये चक्रेऽथाप्यणुव्याख्यानमुत्तमम् ॥

End :

जयन्तीनिर्णयं चक्रे देवकीगर्भजन्मनः ।
कृष्णस्य कृष्णभक्तोऽयं द्वैपायनकराब्जभूः ॥
एतेषां पाठमात्रेण मध्वेशः प्रीयते हरिः ॥

Colophon :

इति मध्वाचार्यग्रन्थनाम सम्पूर्णम् ।
भाष्याणां दश पञ्चकं ....तिस्रश्च निर्णीतयः
विष्णुस्तोत्रयुगं दशप्रकरणं कल्पद्वयं च स्मृतिः ।
श्रीकृष्णामृततन्त्रसार....न्यायावली दीपकं
येनाकारि स एव मध्वमुनिराट् प्रीतोऽस्तु मे सर्वदा ॥

1068
VṚTTARATNĀVALĪ

Beginning :

श्रीसरस्वत्यै नमः । हरिः ओम् ।
श्रीमान् दन्तिमुखो देवः श्रेयांसि विदधातु वः ।
यत्प्रसादेन निर्विघ्नं सिध्यन्ति कृतिनां क्रियाः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

मा भूत्सङ्गो जननि जनैस्तै-
Digitized by Arya Samaj Foundation Chennai and eGangotri
र्यस्ता येषां वालिरह चितैः ।
भाग्योदारैर्भवतु विहारो
भक्तैः सार्धं तव कृपया मे ॥
भूमसगर्वानातनुषे त्वं
देवि निकृष्टा नव्यति भक्त्या ।
भावयतस्ते मूर्त्तिमुदारां
चम्पकमालानिन्दकबाहाम् ॥

End :

मनो व्रजसि जासयल्लगनमंहसां मे यदि
त्वमङ्गमतिचन्द्रिकं विधुतमोहमाबिभ्रती ।
तदा परिणतिं गता द्रुहिणपत्नि पृथ्वी सतां
प्रभावमतिवर्तते मम हि भाग्यसम्पत् सदा ॥

The work illustrates in order the more important among the akṣaravṛttas in verses praising goddess Sarasvati. The work incorporates the names of the gaṇas and the vṛtta in every verse. The title of the work as well as the name of the author is determined from 1069, a commentary on the work.

1069
VṚTTARATNĀVALĪVYĀKHYĀ

Beginning :

श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः ।
श्रेयोवाप्तिनिमित्तानि सेवितानि मनीषिभिः ।
.... गुरुपादाब्जरजांसि कलयामहे ॥
गुरोरपि च देवस्य नान्तरं प्राहुरागमाः ।
तस्मात्तमुच्चचरणं शरणं सततं वृणे ॥
देवता विष्णुरुद्राद्या नास्माकं दृष्टिगोचराः ।
सर्वदेवमयः साक्षाच्छ्रीगुरुः श्रेयसेऽस्तु मे ॥

इह किल कविकुलतिलकः पण्डितवर्यो वेङ्कटेशः प्रारिप्सितार्थसम्प्राप्त्यविच्छिन्नलक्षणहेतुभूतस्य मङ्गलस्य शिष्टाचारपरिप्राप्तत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्यस्य ग्रन्थारम्भलक्षणत्वात् समस्तमङ्गलात्मकं श्रीशब्दमादौ प्रयुञ्जानः प्राथमिकमाशीर्वादरूपं मङ्गलं निदधाति-

श्रीमान् दन्तिमुखो देवः श्रेयांसि विदधातु वः ।
यत्प्रसादेन निर्विघ्नं सिध्यन्ति कृतिनां क्रियाः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

इति । दन्तिमुखः गजाननदेवः । क्रियाः येन पुष्कलाः । श्रीमान् अणिमाद्यष्टैश्वर्यसम्पन्नः । वो युष्माकं श्रेयांसि विदधातु इति ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवधानसरस्वत्याः सूनुनात्रिकुलेन्दुना ।
क्रियते वेङ्कटेशेन वृत्तरत्नावलिर्नवा ॥

End :

संसाराब्धेरुद्धृत्य तद्वासनामुच्छिद्य नित्यशुद्धबुद्धमुक्तस्वरूपं प्रापयेत्यर्थः । रुचिरा वृत्तम् । भजसरजैरेकेन गुरुणा लक्षणम् । अमीषां त्रयाणां समवृत्तत्वेऽपि विषमवृत्तादिपादादौ गणनत्वात् वृत्तमात्रैव कथनमिति ज्ञेयम् ।

इयं शुभा हिमकरमौलिवल्लभा
मनोहरी मरकतराजिभासुरा ।
कराम्बुजाकलितकदम्बकोरका
कलावती कलयतु कांक्षितानि नः ॥

वाग्विभूतिसमृद्ध्यर्थं स्तोत्रं पठत सादरम् ।
संक्षेपतः कृता त्वत्र वृत्तरत्नावलिर्मया ॥

Colophon :

इति वृत्तरत्नावली सटीका समाप्ता ।

1070
PRABODHACANDRIKĀ

Beginning :

हरिः श्रीगणपतये नमः ।

श्रीहरगुरुभक्तः सर्वलोकानुरक्त-
स्त्रिभुवनगतकीर्तिः कान्तकन्दर्पमूर्तिः ।
रणरिपुगणकालो वैजलक्षोणिपालो
जयति जगति दाता सर्वकामोर्थधाता ॥

चन्द्रावतीवदनचन्द्रचकोरधीरः
श्रीविक्रमार्कतनयो नयतन्त्रवेत्ता ।
चौहानवंशतिलकः पटनाधिनाथो
राजा परं जयति वैजलदेवनामा ॥

CC-0. Prof. Satya Vrat Shastri Collection.

रामो मेऽभिहितं करोतु सततं रामं भजे सादरं
रामेणाभिहितं समस्तदुरितं रामाय दत्तं धनम्।
Digitized by Vidyasarathi Foundation Chennai and eGangotri
रामान्मुक्तिरभीप्सिता सरभसं रामस्य दासोऽस्म्यहं ।
रामे रञ्जतु मे मनः करुणया हे राम! मां पालय ।।

श्रीमद्वैजलदेवेन रामभक्तिरतात्मना ।
इति चिन्तितमेकान्ते कदाचित्तिष्ठता मया ।।
अस्थि वज्रमयं यस्य यस्य चर्म च वर्मवत् ।
सो दधीचिः स कर्णश्च नातिष्ठत् सुचिरं भुवि ।।

न सम्प्रति शरीराणि न राज्यानि धनानि च ।
एषां स्वर्गं मृतानां हि कीर्तिर्जयति भूतले ।।

इहलोकसुखं येन परलोकेऽपि जायते ।
तदेव प्रत्यहं कर्म कर्तव्यं दूरदर्शिभिः ।।

संसाराम्भोधितरणं रामनामसुकीर्तनम् ।
रामनामान्विता तस्मात् प्रक्रिया क्रियते मया ।।
बालकानां प्रबोधाय तोषाय विदुषामपि ।
आकल्पमपि संसारे कीर्त्यवस्थापनाय च ।।

चिन्तयन्निति निर्जातः क्रीडन्तं श्रीहिराधरम् ।
श्रीमान् वैजलभूपालो विलोकैरब्रवीत् सुतम् ।।

विद्यया द्योतते राज्यं विद्यया जीयते रिपुः ।
विद्यया जायते कीर्तिः विद्यया लभते यशः ।।

विद्यया जायते धर्मो धर्मेणार्थः प्रजायते ।
अर्थेन जायते राज्यं सुखं राज्येन जायते ।।

विद्या पितेव हितकृत् विद्या मातेव रक्षति ।
विद्या प्रियेव सुखदा विद्या कल्पलतोपमा ।।

विना व्याकरणं वाणी रमणी रमणं विना ।
विवेकं च विना लक्ष्मीर्न सुखाय कदाचन ।।

CC-0. Prof. Satya Vrat Shastri Collection.

तस्माद् व्याकरणं पूर्वं पठ त्वं बुद्धिवृद्धये ।
Digitized by Arya Samaj Foundation Chennai and eGangotri
पश्चान्नीति पठित्वा त्वं राज्यं भज यथासुखम् ॥

End :

कान्तोऽनुगम्यते क्रोशं कान्तया स्निग्धचेतसा ।
अनद्यकर्मणो सत्त्वे कालाद्येऽप्याह कर्मजम् ॥
कुम्भकर्णेन सूच्यन्ते षण्मासा रामभूभुजा ।
वने द्वादशवर्षाणि स्थीयन्ते गुरुशासनात् ॥

Colophon :

इति प्रबोधचन्द्रिकायां कृतौ वैजलभूपतेः ।
इत्युक्तचन्द्रिका सम्यक् समाप्ता च मनोहरा ॥

This is an elementary work on Vyākaraṇa divided into five sections entitled Vibhakticandrikā, Tyādicandrikā (on Tiṅanta), Kārakacandrikā, Samāsacandrikā and Sāmānyavṛthicandrikā. It is the by composed King Vaijala of the Chauhan dynasty of Patan. It is entirely in verse and all the illustrations have a bearing on Śriramā.

1073
ŚABDABHEDAPRAKĀŚA

Beginning :

प्रबोधमाधातुमशाब्दिकानां कृपामुपेत्यापि सतां कवीनाम् ।
कृतो मया रूपमयोऽथ शब्दभेदप्रकाशोऽखिलवाङ्मयार्थः ॥
विद्यादगारमागारमपगानामगामपि ।
अरातिमारातिमथो अप आपः प्रकीर्तितः ॥

End :

प्रायो भवेयुः प्रचुरप्रयोगाः प्रामाणिकोदाहरणे....।
शब्दादिभेदेषु विचारणेषु विचक्षणो विस्तरतामुपैति ॥
क्वचिन्मात्राकृतो भेदः.... कृतोऽत्र च ।
क्वचिदर्थान्तरोल्लेखाच्छब्दानां रूढितः क्वचित् ॥
जागर्ति यस्यैव मनःसरोजे स एव वा ....र्य विवर्तनेशः ।
जयप्रयोगार्पितकामचारः परप्रयोगार्थविशारदश्च ॥

Colophon :

इति पुरुषोत्तमदेवकृतः शब्दभेदप्रकाशः समाप्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

The work deals with the alternative terms of some words due to lengthening, shortening, change of letters etc., mainly based on usage.

Digitized by Arya Samaj Foundation Chennai and eGangotri

1086
KARAṆAPRAKĀŚA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
ब्रह्माच्युतत्रिनयनार्कशशाङ्कभौम-
सोमेड्यशुक्रशनिवागधिपान् गणेशान् ।
नत्वाहमार्यभटशास्त्रसमं करोमि
श्रीब्रह्मदेवगणकः करणप्रकाशम् ॥

शाकः शक्रदशोनितो रविगुणश्चैत्रादिमासान्वितो
अष्टोदत्रिहतो द्विरामसहितो धोभूपनन्दैर्हृतः ।
खाब्ध्यूनो द्विहतः शिलीमुखरसैराप्ताधिमासैर्युतः
खस्त्रिघ्नः सतिथिर्द्विधाकररसैर्युक्तस्ततोधः कृतः ॥

End :

आदौ चान्ते धूम्रवर्णानुरूपः खण्डग्रासे भृङ्गवृन्तानुकारी ।
ग्रासो रक्तः श्यामवर्णोऽधिकेर्धात् सर्वग्रासे पिङ्गलः शीतरश्मिः ॥

Colophon :

इति करणप्रकाशे सोमग्रहणाधिकारः पञ्चमः!

1147
CANDRĀBHARAṆAHORĀ

Beginning :

.... मूढोऽतिसन्तापी ।
क्षीणायुरल्पबुद्धिश्चलस्वभावोऽतिविकलाङ्गः ॥
षष्ठंसम्प्राप्ताष्ठमसंख्ये ।....
.... सौम्योपरागसुदृष्टियुतैः ।
लग्नाधियोगमेतत्पापैः सुखवर्जितैर्भवति ॥

End :

शुभग्रहनिरीक्षणे तत्परिहरति । तथा 66 वर्षे परमायुः । माघमासे कृष्णपक्षे एकादश्यां ज्येष्ठा-नक्षत्रे सोमवारे प्रभातसमये मरणं प्राप्नोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Colophon :

इति श्रीयवाचार्यकृतानन्दाभरणटीकायां मरणकण्टकः समाप्तः ।

Digitized by Vyasa Foundation Chennai and eGangotri

1154
JĀTAKAPHALA

Beginning :

श्रीगणेशाय नमः ।

मानी शूरो महोत्साही क्षातिः पटुमतिस्तथा ।
प्रभवाब्दे नरो जातः दाक्षिण्यगुणवान् भवेत् ॥
सदाचारो धर्मरतः सर्वव्यापारकोविदः ।
डम्भोऽहङ्कारसंयुक्तो विभवाब्दे नरो भवेत् ॥

End :

एकद्वित्रिफलं शून्यं धनधान्यपशुक्षयः ।
चत्वारि मध्यमा न्यस्युः दश तत्रैव मध्यमम् ॥
पञ्चमादिगुणाधिक्यमष्टमं सर्वसिद्धिदम् ।
मध्यात् फलाधिके लाभे लाभात् क्षीणफलेव्यये ।
व्ययात् फलाधिके लग्ने भोगवानर्थवान् सुखी ॥

Details of the horoscopic effects in relation to the following are given :

संवत्सरः, अयनम्, ऋतुः, मासः, पक्षः, तिथिः, वारः, नक्षत्रम्, योगः, करणम्, अंशः, राशिः लग्नः द्रेक्काणः, नवांशः, द्वादशांशः, त्रिंशांशः, भावः, वृक्षः, योनिः, दशा, अष्टवर्गः, कालचक्रदशा, अष्टचक्रदशा ।

1155
JĀTAKASAṄGRAHA

Beginning :

श्रीगुरुभ्यो नमः । सरस्वत्यै नमः । निर्विघ्नमस्तु । शुभमस्तु ।
गुरुभ्यश्च ग्रहेभ्यश्च विघ्नेशं च सरस्वतीम् ।
नमस्कृत्वा च संक्षेपात् कुर्वे जातकसङ्ग्रहम् ॥
वसिष्ठवागीश्वरगार्ग्यमुख्यैर्महर्षिभिर्विस्तरतः कृतेषु ।
शास्त्रेषु बुद्ध्या परिगृह्य सारं बालोपकाराय च कीर्तये च ॥
पूर्वमायुः परीक्ष्येत पश्चाल्लक्षणमादिशेत् ।
अनायुष्मां तु मर्त्यानां लक्षणैः किं प्रयोजनम् ॥
योगायुश्च दशायुश्चेत्यायुर्वै द्विविधं नृणाम् ।
योगोक्तमायुर्योगायुः दशायुश्च दशाकृतम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाकेशत्रुश्च विद्याविनयधनयशःसिद्धिधर्मप्रवृत्ति-
श्चोराराति क्षितीशैर्भयमनुजमृतिः पीडितस्य ग्रहस्य ।
दाये दीनस्य दैन्यं विकलखगदशाशोकरोगप्रदा स्या-
च्चित्तक्लेशः खलस्य प्रतिदिनमरिभिर्मारिताखेटयस्य ॥

1157
JĀTAKASĀRA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

लग्नाच्चिन्त्यं मूर्तिकीर्तिस्थितिं च
चित्तं नेत्रं वाक्कुटुम्बं च वित्तम् ।
धैर्यं वीर्यं भ्रातरं विक्रमं च
विद्या क्षेत्रं वाहनं बान्धवाश्च ॥

End :

कलत्रनाथस्थितभांशकेशयोः
सितक्षपानाथकयोर्बलीयसा ।
दशागमाद्यूनपयुक्तभांशके
त्रिकोणगे देवगुरौ करग्रहः ॥

Colophon :

इति जातकसारे कलत्रचिन्ताध्यायः पञ्चमः ।

1160
JYOTIṢASAṀHITĀRṆAVA

Beginning :

अविघ्नमस्तु । श्रीवेङ्कटेशाय नमः । श्रीगणाधिपतये नमः । श्रीसूर्यादिनवग्रहेभ्यो नमः ।

वन्दे हेरम्बमिन्द्रप्रमुखसुरनतं सर्ववागर्थसिद्ध्यै
येनाम्भस्त्वर्णवानां जलचरसहितं पुष्कराग्रेण पीत्वा ।
विक्षिप्ते तद्विलग्ना जलचरनिकरा राशयो मुक्तिकौघा-
स्तारा भूत्वा भचक्रभ्रमणविधिमिषाद् व्योम्नि ते सञ्चरन्ति ॥
कलक्वाणां वीणां कनकमयकोणां धृतवतीं
लसद्वीणां वाणीं शुकललितवाणीं सुनयनाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

सदालम्बामम्बामधरजितबिम्बामनुदिनं
Digitized by Arya Samaj Foundation Chennai and eGangotri
विधेजायां ध्येयां निगमगणमेयां मनुमहे ॥
कस्तूरिकामसृणकर्दममेचकाब्धि-
पुत्रिपृथून्नतपयोधरशङ्कयेव ।
नीलाचलोपरि निरन्तरकेलिलोलं
नीलं महः किमपि निर्मलमाविरास्ताम् ।
एकः कल्पयुगाब्दमासदिवसाद्यौपाधिकाकारवान्
कालो यस्य गतागतैः कलयते विस्पष्टतां देहिनाम् ।
नित्यं यस्तमसोऽभिरक्षति जगत्साक्षी ग्रहाणां पति-
ज्योतिर्वेदमयोऽव्ययः स भगवान् भानुः शुभायास्तु नः ॥
वर्णः पुरा वनजनाभपदारविन्दा-
न्मन्दाकिनीसहभवो भुवनेऽजनिष्ट ।
तत्रोदभूद्दहरवंशमहाम्बुराशि-
राशाप्रसिद्धविभवो भवनं रमायाः ॥
यत्रोदञ्चितजनाः नाकचपतिगोत्राञ्चिताः कुलोत्तमांसाः ।
आत्मज्ञानप्रवणा नारायणचरणपङ्कजभ्रमराः ॥
यत्रोत्पन्ना धूर्तकर्तर्यमायाकोशाधीशश्वेतनागाङ्कभाजः ।
छद्रापेताश्चरुचारस्सिचिह्वाः सर्वे प्राज्ञाः स्वामिकार्यप्रधानाः ॥
वंशाम्भोधौ विपुलकमले विश्रुतेऽस्मिन् गभीरे
पूर्णे स्वच्छैः सुगुणमणिभिः कीर्तिभास्वत्सुधाढये ।
आविर्भूतो महति बलभद्राह्यः पूर्णचन्द्रो
मोदं कुर्वन् कुवलयतले नित्यवासः कलानाम् ॥
सोऽयं श्रीबलभद्रदाससहितास्थानप्रसादी पुरा
वीरश्रीकपिलेश्वराद्रजपतेस्तत्तत्प्रसङ्गे मुदा ।
प्राप्तानर्ध्यपरिस्फुरच्चतुरचारास्सिप्रसिद्धाहया
मायाकोशमुखप्रचण्डभिदुरा वाचा हि वाचां पतिः ॥
तेनोत्थवाहिविभुना साध्विसोहाणमुदीशिवी नाम ।
यस्याः शासनमनिशं कलयन्ते भूरि गजपते....॥
तस्या....मुदितः सामन्तचूडामणिः
स्वान्तप्रान्तनिरन्तरार्पितहरिर्गङ्गो लसत्कीर्तिमान् ।
सर्वज्ञः पुरुषोत्तमाङ्घ्रिकमलालङ्कारमौलिस्फुर-
च्छास्त्रस्तोमतृतीयलोचनधरो भास्वद्विभूत्यान्वितः ॥
आर्यो हृतः संहृतकाममन्युः सि....रगङ्कः शशिरम्यमूर्त्तिः ।
विश्वेश्वरो नाम महाप्रसादी स्वामिप्रियो श्लाध्यवृषाधिरूढः ॥
तस्याग्रगण्या पतिदेवतानां कान्ता समासीत्कमनीयगात्री ।
पुत्रीव सिन्धोः पुरुषोत्तमस्य कोलाम्बिका शैलसुतेव शम्भोः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

तद्गर्भगम्भीरविदूरभूमादनर्घरत्नाङ्कुरतां प्रपन्नः ।
अजायताथ[illegible] राजा कदम्बेश्वरनामधेयः ॥
Digitized by Vasishtha Tripathi Foundation Chennai and eGangotri
कुवलयनवमोदे जायते भाभिरामे
दगरकुलपयोधौ श्रीकदम्बेश्वरेन्दौ ।
उदयति विबुधाशारवे च मालिन्यशून्या
सपदि भवति पद्मानन्द इत्यत्र चित्रम् ॥
शाकाब्दे युगनागविश्वतुलिते (१४८४) श्रीचित्रभान्वब्दके
ज्येष्ठे कृष्णदशम्युपेतधरणीसून्वह्नि यामे हरौ ।
युग्मेऽर्कज्ञसितारराहुसहिते मेषे श्रिताब्जे मृगे
सर्किर्घे जनिचार्यकेतुसहिते जातः कदम्बेश्वरः ॥
विश्वनाथमहामायाचरणौ शरणं गतः ।
यो नानाविधविद्यासु प्रवीणः प्रमदप्रियः ॥
यस्य श्रीमति मस्तके गजपतिश्रीवीररुद्रक्षमा-
नाथाङ्घ्रिद्वितयं परां कलयते मौलिच्छियं शाश्वतीम् ।
आनम्रप्रतिपक्षभूमिरमणश्रेणीकिरीटेज्ज्वल-
न्माणिक्यद्युतिपुञ्जरञ्जितनखं पङ्केरुहप्रोज्ज्वलम् ॥
वक्ष्ये ज्योतिषसंहितार्णवमिमं सोऽहं कदम्बेश्वरः
स्फायन्मीनकुलीरनक्रमिथुनप्रोच्चण्डराश्यन्वितम् ।
नानावृत्तविचित्ररत्ननिलयं ज्योतिःस्फुरत्पुष्टव-
न्मन्दारप्रमुखप्रभावसुभगं श्रीमद्सुधास्यन्दिनम् ॥
नानाशास्त्रमतल्लिकासु बहुधा संविद्यमानास्वलं
ज्योतिश्शास्त्रविनिर्मिति.... शान्त्येति मैवं वचः ।
अङ्गं ज्योतिषमन्तरेण निगमस्तोमोऽपि नो जृम्भते
सर्वाङ्गैः सहितो न भाति पुरुषश्चक्षुर्विहीनो यथा ॥

प्रसिद्धं खल्वस्य वेदाङ्गत्वं ग्रन्थान्तरेषु-
छन्दः पादौ श्रोत्रमुक्तं निरुक्तं शिक्षा घ्राणं ज्योतिषं चक्षुषी च ।
हस्तौ कल्पः शब्दशास्त्रं च वक्त्रं वेदस्याङ्गान्याहुरेतानि षट् च ॥
न केवलं साधारणवेदाङ्गत्वेनोपादीयत्वमस्य वेदाङ्गेष्वपि प्राधान्यादस्यावश्यं वर्णनीयत्वात् ।

End :

स्ववारे तु स्वहोरायां स्वांशके सत्रगामिनः ।
शुभं कुर्युः प्रतिगमं विपरीताद्विपर्ययः ॥
दशदूरं तथा यातुः कार्यं कालं च युक्तितः ।
समालोच्य वदेद्धीमान् प्रतियात्राफलं गतः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा हि योगादमृतायते विषं
विषायते मध्वपि सर्पिषा समम् ।

Colophon :

इति श्रीमहाराजाधिराजप्रतापरुद्रदेव गजपतिपादारविन्दषट्पदायमानमानसेन सकलविद्वज्जन-चरणपरिचरणसम्पादितप्रज्ञाविभवेन चतुरचारस्सिश्वेतनागामायाभण्डारधूर्तकर्तर्यादिविविधबिरुदवि-दितेन विश्वेश्वरमहाप्रासादिसुतेन कदम्बेश्वराह्यास्थानमहाप्रासादिना सूनृतवादिना विरचिते ज्योति-षसंहितार्णवे वास्तुनिरूपणं नाम द्वादशस्तरङ्गः । (folio 1306)

1168
NAKṢATRACARAṆAKLEŚAPHALA

Beginning :

श्रीगुरुभ्यो नमः ।
अथ नक्षत्राणां चरणक्लेशफलमाह ।

पौलस्त्य उवाच-

अतः परं प्रवक्ष्यामि ज्वरकर्म यथास्थितम् ।
आदौ नक्षत्रवेलायां ज्वरपातं महामुने ॥
ज्वरशान्ति.... तु यैन जानन्ति मोहिताः ।
सर्वं तु विफलं तेषां तुषारमिव कण्डनम् ।
यद्दत्वा पूर्ववेलायां सफलं तेषु सर्वदा ॥
नक्षत्रस्य त्रयो भागा आदिमध्यान्तमेव च ।
विंशतिर्घटिकाभागान् नक्षत्रांशे प्रकल्पयेत् ॥
नक्षत्रस्य विभागे तु ज्वरो भवति वा नृणाम् ।
कृत्तिकादौ प्रवक्ष्यामि नक्षत्राणां च लक्षणम् ॥
कृत्तिकायां ज्वरं तीव्रं व्याधिर्भवति कण्टकम् ।
प्रथमे नवरात्रं तु द्वितीये चाष्टवासराः ॥
वासराः षड्विजानीयात्तृत्रीयांशे न संशयः ॥

End :

ऋक्षे च यमदैवत्ये भरण्यां च महामुने ।
प्रथमांशे च सप्ताहं मध्ये मृत्युं विनिर्दिशेत् ॥
अन्ते विद्यात् त्रयो मासान् दिनसंख्या प्रकीर्तिता ।

Colophon :

इति नक्षत्रचरणक्लेशफलम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning :

श्रीगणपतये नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । निर्विघ्नमस्तु । शुभमस्तु ।

श्रीरङ्गभोगशयनोपरि जातनिद्रं
नीलाद्भुतं निखिलपालनजागरूकम् ।
श्रीरामचन्द्रकुलदैवतमब्जनाभं
श्रीरङ्गनायकमहं प्रणतोऽस्मि नित्यम् ॥
श्रीमच्छेषगिरेस्तटाधिनिलयं श्रीवेङ्कटेशं गुरुं
नत्वा वेङ्कटनायकस्त्वनुदिनं जातोपधार्यः सुधीः ।
ज्योतिश्शास्त्रमहाब्धिंपारगमुनेर्वक्ष्यामि पोतात्मकं
ज्योतिश्शास्त्रविवेकपाकविपुलं सर्वार्थचिन्तामणिम् ॥
नीलाम्बुजरुचं देवं सकृद् यान्ति मनोरथम् ।
देवाः प्रणम्य यं सर्वे तं नमामि गजाननम् ॥
वाग्विभूतिप्रदा देवी या श्वेताम्बुरुहासना ।
कर्पूरधवलाकारा स्वयं लसतु वाचि मे ॥
मेषादिराशयः सर्वे दिनेशप्रमुखा ग्रहाः ।
ये च लोकोपकर्तारः पान्तु मामिह तेजसा ॥
यज्जातके निगदितं भुवि मानवानां
तत्प्राश्निकेऽपि सकलं कथयन्ति तज्ज्ञाः ।
प्राप्तोऽपि जन्मसदृशो भवति प्रभेदः
प्रश्नस्य चात्र जननस्य स कश्चिदस्ति ॥

End :

इत्यादौ फलमेवं स्यादन्ये शोभनमादिशेत् ।
कपिगोभूमिलाभं च द्वेषं चैव मतिभ्रमम् ॥
दुःस्वप्नं गौलिपतनमपकीर्तिं लभेन्नरः ।
पाके गोभूषणमहमारोग्यं देहकान्ति च ॥

1199
HORĀSĀRA

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरवे नमः ।
जयति जगदेकहेतुर्विश्वात्मा सर्वलोकदीपकरः ।
अनुदिनमुदयविनाशस्थितिकर्ता भास्करो दिनाधीशः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

निमित्तादिवत्सरान्तं कालं राशिप्रमाणमेकैकम् ।
Digitized by Arya Samaj Foundation Chennai and eGangotri
गणितस्कन्धे प्रोक्तं पूर्वं ग्रहचारिलक्षणैः साधम् ॥
होरास्कन्धे सम्यग्दशाविभागं पुरा विनिर्दिष्टम् ।
विस्तारशास्त्रमार्गैर्न शक्यते मन्दबुद्धिभिर्ज्ञातुम् ॥
तस्मात् प्रयोगसिद्धैराचार्यैर्यत्फलं सुसिद्धम् ।
तत् सुस्पष्टं वक्ष्ये होराशास्त्रार्णवात् सर्वम् ॥

Beginning :

अष्टाविंशतिवर्षे मरणं चन्द्राकराहमोयुक्षाः लग्नस्याः ।
कुर्वन्ति तदा जीवे व्यये निय(तं) मरणं नग्न्यच्छुभसंयुते केन्द्रे ॥
चन्द्रः क्षीणः स्वर्क्षे निधनेशे केन्द्रगेऽष्टमे पापे ।

1200
ĀCĀRASAṄGRAHA

Beginning :

श्रीगुरुभ्यो नमः । हरिः ओम् ।
यत्पादपद्मद्वन्द्वं स्मरतां सिध्यत्यभीष्टमरुणतरम् ।
दहनप्लावनदक्षैः करैः प्रकाशीकृताखिलं वन्दे ॥
आचारस्य प्रधानत्वात् सर्वेषु शुभकर्मसु ।
आचारसङ्ग्रहं शिष्यहितायाद्य करोम्यहम् ॥
प्रथमं तत्र गण्यन्ते दोषाः संक्षेपतो भयात् ।
गुणानामपि दोषाणामियित्ता नैव विद्यते ॥
सूर्येन्दुग्रहणं लाटवैधृतौ केतुदर्शनम् ।
शिवाविक्रोशनं भूमिकम्पो मेघस्य गर्जनम् ॥
निर्धातोल्कानिपातेन्दुदुष्टतानिष्टदर्शनम् ।
श्वानविक्रोशनं विश्नं प्रदोषे गुलिकोदयः ॥

End :

एको हि दोषो वेधाख्यो गुणान् हन्ति बहूनपि ।
अतो विवर्जयेद्वेधं मध्यरज्जुश्च तत्समः ॥
दम्पत्योः पादपाण्यादेः लक्षणं लग्नतः फलम् ।
निमित्तं चापि निश्चित्य विवाहं कारयेद्बुधः ॥
अतीव चिन्तनीया हि नृणामुद्वाहनक्रिया ।
पितुः पिता मे गुरुरग्रजन्मा गोविन्दनामा भुवि विश्रुतो यः ।
तेनोदितो यो गुरुभक्तितो मां प्राप्तः शुभाचार इह प्रदिष्टः ॥

This is on the fixation of astrologically suitable days for the various saṁskāras from Garbhādhāna to Vivāha, written by the author as taught to him by his grandfather Govinda.

CC-0. Prof. Satya Vrat Shastri Collection.

KĀLAVINIRNAYA

Digitized by Arya Samaj Foundation Chennai and eGangotri

(with commentary)

Beginning :

श्रीगणेशाय नमः । श्रीमध्वगुरुभ्यो नमः ।
ब्रह्मादयो यद्वशगा युगादिकालप्रभेदाश्च यदीयभेदाः ।
कालाय कंसान्तकमूर्तयेऽहं नित्याय तस्मै विभवे नतोऽस्मि ।।
पादप्रणामाखिलदेवमौलिमाणिक्यनीराजितपादपद्मा ।
अविघ्नमाविष्कृतलोक.... मनोरथा.... नमामि ।।
विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी कालं विनिर्णेष्यति मन्दबुद्ध्यै ।।
ननु स कालत्वेनोपयुज्यते यो निर्णीयते, तत्त्वाह-
कालो विधिबलाद्दर्शपूर्णमासादिकर्मसु ।
अङ्गत्वेनेष्यते तस्मादसौ निर्णयते मया ।।

End :

तथा च स्मृतिः -

त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन ।
उपोष्यैकादशी तत्र दशमी निर्जिता भवेत् ।।

इति । नन्वत्र वचने व्यवस्था न प्रतीयते । सत्यं, वचनान्तरेण प्रतीयते -

दशमीमिश्रितात् पूर्वाद् द्वादशी यदि लभ्यते ।
एकादशी तदा ब्रह्मन्नुपवासः....

The work is on the decision of auspicious muhūrtas for various ceremonies. The author Ādityasūri is the disciple of Viśveśvarācārya.

1207
MUHŪRTATATTVA

Beginning :

श्रीगणपतये नमः ।

गणाधीशं नमस्कृत्य ज्योतिषं व्यवहारिकम् ।
मौहूर्ततत्त्वं वक्ष्येऽहं केशवोऽथाद्यशास्त्रतः ।।
दर्शं संक्रान्तिपातौ परिघमुखदलं वैधृतिं पातयोगं
विष्कम्भाद्यत्रिनाडीः शुभकृतिषु च षड् गण्डयोः पञ्चशूले ।
व्याघाते वज्रकेङ्काः पितृमृतिदिवसोनाधिमासान् कुहौरान्
जह्या जन्मोत्थमासोडुतिथिखलुतिथिव्युद्गमां ह्युद्गमां च ।।

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिश्शास्त्रमहार्णवादुदहरन्मोहूर्ततत्त्वं बहु-
व्याप्यल्पं गुरुवैद्यनाथचरणद्वन्द्वे रतः केशवः ।
नन्दिग्रामगतः सुतस्तु कमलज्योतिर्विदग्र्यस्य तद्
योऽधीते स विराजते सदसि चादर्शी यशस्वी क्षितौ ॥

Colophon :

इति मुहूर्ततत्त्वं सम्पूर्णम् ।

The author Keśava is the disciple of Vaidyanātha.

1208
MUHŪRTADĪPAKA

Beginning :

श्री गुरुभ्यो नमः ।
प्रणम्यैकरदं वन्दे शारदां गुरुमेव च ।
मुहूर्तदीपकं कुर्वे बालाज्ञानतमोपहम् ॥
नन्दा भद्रा जयाख्या प्रतिपदभिमुखा रिक्तिका स्युश्च पूर्णा
संज्ञा तुल्यार्थकृत्या भृगुविसवनिजार्काज्यवारेषु सिद्धाः ।
स्त्रीसेवाक्षौरतैलामिषमशुभमभाभूतषष्ठ्यमीषु
स्नानं नाशाक्षिविश्वैः परिमिततिथिषु त्रिंशदङ्गादितुल्यैः ॥

End :

आद्यानामनवद्यपद्यरचनानामाविचिन्त्यात्मना
लोकानं व्यवहारदर्शनविधौ सप्तेषुवृत्ते स्फुटे ।
श्रीमद्दैवतराजपूजितपदः श्रीका....
सूनुस्तस्य मुहूर्तदीपमकरोद् देवो महादेववित् ॥

Colophon :

इति श्रीमहादेवभट्टविरचितो मुहूर्तदीपः समाप्तः ।

1232
PĀŚAŚAKUNI

Beginning :

श्रीगणेशाय नमः । अविघ्नमस्तु ।
महादेवं नमस्कृत्य केवलज्ञानभास्करम् ।
वक्ष्ये सद्गुरुणादिष्टं ज्ञेयं चैव शुभाशुभम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

पदं पदं पदं चैव पतितं शोभनं तव ।
शुभं च दृश्यते तत्र सर्वारम्भेषु चिन्तितम् ।
Digitized by Arya Samaj Foundation Chennai and eGangotri
सङ्ग्रामे चार्थलाभे च व्यवहारे समागमे ।
शोभनं चैव वक्तव्यं होराज्ञानैस्तु चिन्तकैः ॥
पदं पदं द्विकं चान्ते पतितामत्र कर्तरि ।
देवदेवं प्रपद्यस्व कार्यमन्यद्विचिन्तय ॥

End :

यं त्वं चिन्तयसे क्षिप्रं सिद्धिस्ते समुपस्थितः ।
प्रेषणागमनं तत्र लाभस्थानं पुनः पुनः ॥
किञ्चित्कालं प्रतीक्षस्व ततः सिद्धिर्भविष्यति ।
तथैकेन तु मासेन तथैकदिवसेन तु ॥
इति चतुर्थपादः ।

Colophon :

इति गर्गाचार्यविरचिता पाशशकुनिः समाप्ता ।
The work is on a particular kind of Praśna.

1233
PRAŚNADĪPAKĀ

Beginning :

श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः ।
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ।
गुरुभ्यश्च ग्रहेभ्यश्च मया बद्धोऽयमञ्जलिः ।
प्रसन्नमनसस्ते मे सत्यां कुर्वन्तु भारतीम् ॥
नमः श्रीमङ्गलश्रेणीनिवासाय महात्मने ।
सर्वं जानाति दैवज्ञा यदुक्तश्रुतचक्षुषा ॥
गोश्रीपुरेश्वरौ नत्वा क्रियते प्रश्नदीपिका ।
ब्रह्मभट्टस्य पुत्रेण रामशर्माभिधायिना ॥
प्रश्नशास्त्राणि सर्वाणि समालोक्य मुहूर्मुहुः ।
ततः सारं समुद्धृत्य क्रियते प्रश्नदीपिका ॥

End :

जीवो जीवेन वाच्यः क्षितिसुतफणिनौ धातुदौ सर्वपक्षे
धातुर्मूलं विकल्प्य.... जीवमूलं च तद्वत् ।
.... बुधभृगुतनयौ.... धातुमूलं च जीवः

CC-0. Prof. Satya Vrat Shastri Collection.

The author Rāmaśarman is the son of Brahmabhaṭṭa and disciple of Mangalaśśeri (Nampūtiri). He seems to have belonged to Cochin.

Digitized by Arya Samaj Foundation Chennai and eGangotri

1244
BĀDHAKADĪPAKĀ

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
नत्वा दन्तिवराननं गुरुजनं पीताम्बरं भारतीं
मार्ताण्डादि नवग्रहानपि तथा कात्यायनीवल्लभम् ।
बाधाशास्त्रपयोनिधिप्रतरणायोपायमन्विच्छता-
मेतां बाधकदीपकाख्यतरणिं स्वल्पामहं प्रारभे ॥
लग्ने स्युः स्थिरभे चरेऽप्युभयभे धर्मार्थकामाः क्रमाद्
बाधास्थानमिहोच्यतेऽपि विहगैस्तत्केन्द्रगैर्बाधकम् ।
बाधास्थे तरणौ गदं शिवकृतं भूताधिपैः शाम्भवैः
शीतांशावपि धर्मदैवफणभृद्दुर्गाकृतं वा गदम् ॥

End :

मधुनि प्रीयते यक्षः घृते मृत्युञ्जयस्तथा ।
क्षीरे तारागणाः सर्वे दध्नि सिद्धाः प्रकीर्तिताः ॥
लवणे वरुणः प्रीतः पिष्टे देवः प्रजापतिः ।
अन्नदानेन महता प्रीताः सर्वेऽपि देवताः ॥

1250
SUGRĪVAVĀKYA

Beginning :

श्रीगुरुभ्यो नमः । हरिः ओम् ।
सुग्रीवो रामचन्द्रेण राज्ञा प्रश्नो यथोदितः ।
पृच्छामि कालमेकं स्याज्ज्ञातव्यं च विचक्षणैः ॥
अर्धचन्द्राकृतिः प्रोक्तो विभागो वामतः शुभम् ।
क्रमेण चाष्टहारं च ग्रहशेषं फलं भवेत् ॥ अष्टोत्तरसंख्या ।

लाभः
११२

भानुद्वयं शशिर्यत्र पुत्रलाभं शुभं भवेत् ।
आयुरारोग्यमैश्वर्यं सुखसौभाग्यसम्पदः ॥

भयम्
१२१

दृश्यते रविचन्द्रार्का अर्थनाशं महद्भयम् ।
प्राप्नोति सर्वरोगित्वं बन्धनं विग्रहो भवेत् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

End :

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाभः राहुद्वयं बुधो यत्र गमनं लाभमुत्तमम् ।

८८४ कल्याणं चैव माङ्गल्यं सर्वदा शुभसम्पदः ॥

Colophon :

इति सुग्रीववाक्यं सम्पूर्णम् ।

1284
KUMĀṚATANTRA

Beginning :

श्रीगुरुभ्यो नमः । ओम् ।
बालारिष्टाबलिः ।
प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दना नाम मातृका ।
तया गृहीतमात्रे च प्रथमं भवति ज्वरः ।
अशुभं शब्दं मुञ्चति आत्कारं च करोति स्तन्यं न गृह्णाति ।
बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते सुखम् ।

End :

शान्त्युदकेन स्नापयेत् । शिवनिर्माल्यगुग्गुलुसर्षपधूतैर्धूपयेत् । ओं नमो नारायणाय मुञ्च मुञ्च हन हन स्वाहा । चतुर्थदिवसे ब्राह्मणान् भोजयेत् । ततः स्वस्थो भवति बालकः ।

Colophon :

इति रावणकृतं कुमारतन्त्रं समाप्तम् ।

1285
